ལྷ་གཅིག་ཏུ་ཀུགས་ཐོས་གྱུར་ནས། སངས་སྨད་སལ་འོད་པ་ལྟའི།
བླང་ཆེར་མཆོག་ཏུ་མཛེས་པ་ནི། མིད་དུ་བྱང་བ་བདག་གིས་བཟུང་ 11

སྐབས་གསུམ་པར་འོས་སོ་གཉིས་འདི། སྒོ་ནས་སོ་རབ་ཏུ་གཟིགས།
གང་ཕྱིར་ཇི་བཞིན་གཟིགས་གྱུར་ན། གཡོག་འཁོར་ངལ་འབྲས་དང་བཅས། 12

དེ་དག་ཐོས་ནས་མི་བདག་ནི། ཏིཀ་ལ་ཡང་དག་བཀོས་ནས་སོང་།
སྒོར་ནི་སོ་གཉིས་ཀྱི་ལ་ཡ། གཡོ་བ་ལྟ་བུ་མཐོང་གྱུར་ཏེ། 13

རབ་ལྷག་དྲི་བཟང་གིས་བོས་བ། བྱང་བ་འབྱམ་པའི་ངོ་ནོམས་ཀྱིས།
སྐག་པའི་གྱོན་ནི་ཡིད་འོང་བ། དཔྱིད་ཀ་བཞིན་དུ་རབ་དུ་བསྟེན། 14

འབིགས་བྱེད་ཀྱི་ནི་ཆུ་ཤེང་དང་། ཤ་ལ་ཀི་ཡི་ནགས་ཀྱི་དཔལ།
དྲན་ལས་མིག་ནི་ཟློམ་གྱུར་ཅིང་། སོ་ཡི་བར་དུ་ལག་པ་བཀྱངས། 15

འདབ་མ་བདུན་པའི་དྲིས་ཀྱིས་ཤིང་། ཛ་གསྡུ་ཡིས་བསྡན་པ་ལས།
འབིགས་བྱེད་མི་གཡོ་ཤ་ལ་ནི། བླང་པོའི་གྱོལ་པོར་གྱུར་ལྟར་མཁོ། 16

སོ་ཡི་ཀ་བས་རབ་བཀྱོན་ཅིང་། དཔལ་འབྱོར་རྣམ་པར་རྩེ་བའི་གནས།
དེ་ནི་རྣམ་གཟིགས་ཤ་ཡི་བདག། ཡ་མཚན་གྱུར་ནས་འདི་ལྟར་བས་མས། 17

ཞེ་མ་གསར་པ་གསར་པར་ནི། རབ་གྱུར་ངོ་མཚར་སྤྲོལ་བྱེད་པ།
བསྟན་ཤ་འདི་ལས་རྣོ་མོས་འཁོར་བར་ནི། སྤྲོས་པའི་གྱོན་དག་ཚད་པ་མེད། 18

देव दिव्यद्युतिर्दन्ती गृहीतोऽस्माभिरद्भुतः ।
त्वत्कीर्त्तिश्रवणाद्भूमिमैरावण इवागतः[1] ॥ ११ ॥

द्वारि स्थितोऽसौ द्विरदस्त्विदृशार्हः[2] प्रदृश्यतां ।
भृत्यानां प्रभुना दृष्टः सफलो हि परिश्रमः ॥ १२ ॥

एतदाकर्ण्य नृपतिर्निर्गत्यामात्यसम्मतः ।
ददर्श द्विरदं द्वारि कैलाशमिव जङ्गमं ॥ १३ ॥

उद्दामसौरभाकृष्टै र्भ्रमरै र्गण्डडिण्डिमैः ।
शृङ्गाराभरणोदारं वसन्तमिव सेवितं ॥ १४ ॥

दन्तपर्य्यन्तविश्रान्तकरं मिलितलोचनं ।
स्मरन्तं विन्यकदली-शल्लकी-काननश्रियः ॥ १५ ॥

अगस्त्यशासनात् यातं भुवि कुञ्जरराजतां ।
स्फुरत्[3]-सप्तच्छदामोदं विन्याचलमिवोन्नतम् ॥ १६ ॥

तं विलोक्य क्षितिपतिर्दन्तस्तम्भविभूषितं ।
लक्ष्मीविलासभवनं विस्मयादित्यचिन्तयत् ॥ १७ ॥

अहो नवनवोत्कर्षा निर्म्माणाश्चर्य्यशालिनाम् ।
कर्म्मणामनवच्छिन्ना संसारसर्गसन्ततिः ॥ १८ ॥

---

१ Orig. इवामितः । २ Orig. °शार्हं । ३ Orig. स्फुर्ज्जत् ।

བདུད་རྩིའི་རྒྱ་གཏེར་མ་བསྡུབས་ཤིང་། ནོར་བྱོས་ཐང་ཡང་མ་བཅད་ལ།
རི་བོ་བསྒྲིལ་བ་མེད་པར་ནི། བླང་པོ་འདི་ནི་སྡུ་ཡིས་བསྒྲུབ། 19

དེ་ནས་བླང་ཆེན་ཁ་ལོ་པ། ཀུན་དུ་བཟོད་ཅེས་བཀའ་གཏན་ལ།
བླང་ཆེན་འདི་ནི་ཐུལ་ཅིག་ཅེས། སངས་བདག་པོས་ཀུན་དུ་བསྟན། 20

དཀའ་མས་སྐྱོང་ནང་གི་ནི། བློང་གི་ཁང་པར་གཉིས་པར་བྱུར།
བསྟབ་པ་ཀུན་གྱི་ངུར་བཟོད་པའི། བླང་ཆེན་ཀུན་དུ་བཟོད་ཀྱིས་བཟློང་། 21

དེ་ཡི་སྨོན་མ་དམ་པ་བཞིན། སྐྱེ་བ་སྣར་གོམས་པདང་བྱུར་པ།
ཤེས་རབ་ལྡན་དེས་འབད་མེད་དུ། བསྟབ་པ་ཀུན་གྱིས་ནོམ་དུལ་ཐོབ། 22

སྨྲིན་མང་གདུང་བ་མེད་པ་དང་། སྟོབས་དང་སྨྲ་ལྡན་བཟོད་པར་ལྡན།
དབྱ་འཛེམས་ལེགས་པར་འགྲོ་བ་དེ། ཀུལ་པོ་ཉིད་དང་མཚུངས་པར་བྱུར། 23

དེ་ནས་བླང་པོའི་དབང་པོ་དེ། གདུལ་བའི་བྱ་བ་མཐར་ཕྱིན་ནས།
བྱ་བ་བྱས་པའི་ཀུན་བཟོད་ཀྱིས། མི་དབང་ལ་ནི་སྨན་པར་བྱུར། 24

ནོམ་འབྱུང་མེད་པའི་སྟོབས་ཀྱིས་པ། ལྷགས་ཀྱི་དབང་བྱུར་དེ་མཐོང་ནས།
སྨྲ་བ་ཡི་ནི་རྩེར་ཞུགས་པ། ཀུལ་པོའི་དཔལ་དུ་ཀུལ་པོས་བསམས། 25

དེ་ནས་རབ་དགའ་ཡང་དག་སྐྱེས། མཁས་པར་བསྟབས་པ་བལྟ་ཕྱིར་དེ།
འོད་སྟོང་ཤེར་ཀྱི་རི་ལ་བཞིན། དེ་ལ་སྨྲ་བ་ཆེན་པོས་ཞོན། 26

अमन्थेन सुधाम्भोधेरनायासेन वासुकेः ।
अनाकर्षेण शैलस्य केनायं जनितो गजः ॥ १९ ॥

अथ हस्तिमहामात्यं संयातं नाम भूपतिः ।
आदिदेशार्चितादेशं गजोऽयं दम्यतामिति ॥ २० ॥

तदादिश्य महीपाले यातेऽन्तःपुरमन्दिरम् ।
नागं जग्राह संयातः सर्वशिक्षाभरक्षमम् ॥ २१ ॥

स सच्छिष्य इव प्राज्ञः प्राग्जन्माभ्यासयन्त्रितः ।
नीतस्तेन प्रयत्नेन सर्वशिक्षाविनीतताम् ॥ २२ ॥

बहुदाननिरुद्वेगः शक्त्युत्साहयुतक्षमी ।
रिपुप्रघातसुगतिः[1] स राज्ञस्तुल्यतां ययौ ॥ २३ ॥

दम्यक्रियासमुत्तीर्णं ततस्तं कुञ्जरेश्वरम् ।
नरेश्वराय संयातः कृतकृत्यो न्यवेदयत् ॥ २४ ॥

दृष्ट्वा तमङ्कुशायत्तं निर्विकारवलोदयम् ।
उत्साहशिखरारूढं मेने राजा जयश्रियम् ॥ २५ ॥

स सञ्जातप्रहर्षोत्थदाक्षशिक्षादिदृक्षया ।
तमारुरोह सोत्साहः सहस्रांशुरिवोदयम् ॥ २६ ॥

---

१ Orig. प्रघतिसुगतिः ।

དེ་ནས་བླང་པའི་དབང་པོ་དེའི། དཀྱིལ་འཁོར་ཀུན་དུ་ཡང་དག་བྱུ།
མཁས་པ་ཆོས་བཞིན་དབང་སྐུར་བ། ཀུན་དུ་བཟོད་ཀྱིས་ཡང་དག་བརྟན། 27

བྱུལ་བོ་རང་གི་སྤྲོ་བ་བཞིན། བླང་པོ་བཤད་བའི་ཞར་ལའི།
ཇོན་ལ་རྩེ་ཞིང་དག་འཇུག་པས། ཆེ་བའི་ནགས་སྐུ་འབྱམས་པར་བྱུར། 28

རིན་ཆེན་དཔུང་བྱོན་འོད་ཟེར་གི། རིང་དུ་འཕྲོ་དེ་ཤ་ཎྜ་ཀའི།
ལོ་འདབ་མཆོག་གི་ཕྱོགས་ཀྱི་ནི། བླང་རོམས་འབོད་པ་ལྟ་བུར་སོང་། 29

ནགས་སྐུ་དེ་ནི་འགྲོ་བ་དག། རབ་དགའ་ཡ་མཚན་ཀུན་བྱོས་ཤིང་།
མིག་ནི་ཧོར་བར་ཇོགས་བྱས་པ། ནགས་ཀྱི་ལྷ་ཡིས་མཐོང་བར་བྱུར། 30

ཧོར་འཛོམ་གྱི་བདག་དབང་པོ་དེ། ཤ་བར་ཡི་སྐྱ་ཚོགས་ཀྱིས།
མེ་ཏོག་དྲི་བཟང་ཛོགས་པའི་གྱོས། འབིགས་བྱེད་རྒྱང་བསྟེན་པར་བྱུར། 31

དེ་ནས་འབིགས་བྱེད་ཉེ་བ་ནི། རང་དབང་བདེ་བའི་འདབ་ལྟེན་པས།
ཆེ་དགའི་བསམ་པ་དྲན་བྱུར་ཏེ། བླང་པོ་ཤིན་དུ་ཆོག་པར་བྱུར། 32

དགའ་བས་བཅིངས་པའི་བླང་མོ་ཡི། དྲི་མ་སྣོམ་ཞེང་གཉིས་འཐུང་དེ། ..
མི་བདག་གཡེར་བས་ལུགས་བཞིན་དུ། ལུགས་ཀྱི་དབང་དུ་གྱུར་པ་བཏང་། 33

སོ་ལྟན་འདོད་ཆགས་ཀྱིས་བཀུག་པ། རྗེས་སུ་ཆགས་བཅས་བྱོག་པ་དེ།
རྒོང་པ་འཁོད་བ་དག་ལ་བཞིན། གང་དུའང་དགའ་དང་བཅལ་མ་བྱུར། 34

संयातोऽथ गजेन्द्रस्य मन्त्रीव वशवर्त्तिनः ।
सर्वमण्डलसञ्चारचातुर्यं समदर्शयत् ॥ २७ ॥

गजप्रेक्षाप्रसङ्गेन मृगयाकेलिलालसः ।
राजा निजोत्साहमिव व्यगाहत वनं महत् ॥ २८ ॥

स ययौ रत्नकेयूरकिरणैर्दूरसर्पिभिः ।
शल्लकीपल्लववरैर् दिग्नागानाह्वयन्निव ॥ २९ ॥

व्रजन्तं तच दृष्ट्वुस्तं वने वनदेवताः[1] ।
प्रहर्षविस्मयाकीर्णकर्णपूरीकृतेक्षणाः ॥ ३० ॥

शवरीकवरीपाशपुष्पसौरभनिर्भराः ।
विन्ध्या वसुन्धराधीशं मरुतस्तं सिषेविरे ॥ ३१ ॥

अथ विन्ध्योपकण्ठेषु स्वच्छन्दसुखशाखिषु ।
स्मृत्वा विलासवृत्तान्तं गजः सोत्कण्ठतां ययौ ॥ ३२ ॥

करिण्याः प्रेमबद्धाया गन्धमाघ्राय स द्विपः ।
नीतिं नृप इवोत्सिक्तस्तत्याजाङ्कुशयन्त्रणाम् ॥ ३३ ॥

सवेगं धावतस्तस्य रागाकृष्टस्य दण्डिनः ।
विमूढस्येव संसारे नाभवत् विरतिः क्वचित् ॥ ३४ ॥

---

१ Orig. व्रजन्ति दृष्ट्वुस्तम् वने वनदेवता ।

བླུང་བཞིན་མགྲོགས་པར་བགྲོད་པ་ཡི། བླང་པོ་མཐོང་ནས་ཐེ་ཚོམ་གཅོ།
སྐྱེས་བའི་ཀུལ་པོ་བླང་པོ་ཡིས། ཀུན་དུ་བགྲོད་ལ་འདི་སྨྲས་སོ། 35

ཀྱེ་མ་མ་ལ་བླང་པོ་འདི། ཁྱོད་ཀྱིས་འདུལ་བ་འཛིན་དུ་བཙུན།
ལྷག་སར་ཀུ་སྡིག་བ་དག་ལས་ཀྱང་། གང་ཞིག་ཕྱིར་ཕྱོགས་སོང་བ་མཐོང་། 36

འདི་ཡི་ཀོང་བཀོད་ཁར་བྱིས་ནི། ཕྱོགས་ཀྱི་འཁོར་ལོའཁོར་བ་བཞིག
ཀོང་པས་འཕྱང་ནོམས་རྟེས་སྐྱོག་བཞིག། སར་ནོམས་ཀུན་འབྱུལ་མྱོས་པ་བཞིག། 37

འདིར་ཀི་ཁ་རྟེ་དུས་མིན་པས། རབ་དུ་མི་མཐུན་བྱུང་པ་བཞིག།
སྐྱེས་བུའི་བྱ་བ་ཐམས་ཅད་ལ། འབད་པས་ཞུགས་པ་འབྲས་མེད་བྱུས། 38

དེ་སྐད་རྟེ་ཡི་གསུང་ཐོས་ནས། འཇིགས་པར་གྱུར་པའི་ཀུན་དུ་བགྲོད།
བསྐྲན་པ་སྐད་པས་སྐྱབས་བྱུང་ཅིང། ཐལ་མོ་སྦྱར་བ་བྱས་ནས་སྐྲས། 39

ཁྱ་གཅིག་བདག་གི་བླང་པོ་འདི། བྱ་བ་ཀུན་གྱི་དབང་དུ་བགྱིས།
འོན་ཀྱང་དེ་རིང་བླང་མོ་ཡི། དྲི་མ་མནམ་ཞིང་ཧོམ་འགྱུར་གྱུར། 40

འདོད་པའི་དབང་དུ་གྱུར་པ་ཡི། སྐྱེ་བོ་ཧོམས་ཀི་ཆུན་ངག་མིན།
སྟོམ་པ་མ་ཡིན་ཡོན་མིན་ཞིང་། ལེགས་པ་ཉིད་མིན་འདོད་པ་དྲན། 41

ཡུལ་ལ་མངོན་པར་ཕྱོགས་པའི་ཐྲི། དགའ་བའི་ངོ་ལ་ཆགས་བྱུང་པ།
གཡོང་གཡོང་མང་ཡོད་རི་ཡི་ཚུ། ཧོམ་པར་ཆྱང་བཞིན་སྲུ་ཡིས་བཐྲོག། 42

दृष्ट्वा प्रभञ्जनजवं कुञ्जरं राजकुञ्जरः ।
व्रजन्तं जातसन्देहः संयातमिदमब्रवीत् ॥ ३५ ॥

अहोवतायं भवता विनयग्राहितो गजः ।
दृष्टः प्रयातो वैमुख्यं गुरोरस्याङ्कुशस्य यः ॥ ३६ ॥

भ्रमतीव दिशां चक्रमनुयान्तीव पादपाः ।
पादन्यासभरेणास्य क्षीवेणाघूर्णते क्षितिः ॥ ३७ ॥

अस्मिन् देव इवाकाले प्रयाते प्रतिकूलताम् ।
सर्व्वाः पुरुषकारस्य निष्फला यत्नवृत्तयः ॥ ३८ ॥

वचः श्रुत्वेति संयातः प्रभोरायातसाध्वसः[1] ।
शिक्षापवादवैलक्ष्यादुवाच रचिताञ्जलिः ॥ ३९ ॥

देव सर्व्वक्रियायत्तः कुञ्जरोऽयं मया कृतः ।
करिणीगन्धमाघ्राय यातः किन्वद्य विक्रियाम् ॥ ४० ॥

नोपदेशं न नियमं न दाक्षिण्यं न साधुताम् ।
स्मरन्ति जन्तवः कामं कामस्य वशमागताः ॥ ४१ ॥

केन रतिरसोत्सिक्ता विषयाभिमुखी मतिः ।
अदभ्रश्वभ्रविभ्रष्टशैलकूल्येव वार्य्यते ॥ ४२ ॥

---

१ Orig. °रायतसाध्वसः ।

ལུས་ནི་ངལ་བའི་བསླབ་པ་ལ། འདུལ་བར་བྱེད་པ་ཁོ་ནོ་མཁས།
ཡིད་ནི་སྟོོན་པའི་བསླབ་པ་ལ། སྒབ་པ་ཆོས་ཀུང་མཁས་པ་ཡིན། 43

ཚགས་ལས་ངལ་བར་མི་རྟོག་ཅིང་། བསྟམས་པ་མལ་ལུས་བཟལ་བྱར་དེ།
ངན་སོོང་བཞིར་དུ་ལམ་མེད་ནས། གཉིས་འགྲུབ་འདི་ནི་རབ་དུ་གྲུགས། 44

སྐྱེ་བོ་ངན་པ་ཡང་རེ་ལྟུང་། ངེས་པར་ལྟུང་བར་བགྱིད་པ་ཉིད།
ས་བདག་ཉོོན་པའི་ལོ་མ་ཆོས་ས། ཡང་དག་བརྟུང་ལ་འདི་ནི་ཐོོང་། 45

མི་བདག་གིས་ནི་ཀུན་དུ་འགྲོ་བ། དེ་དུས་སུ་འོས་ཆོག་ཐོས་ནས།
དེ་དང་ལྡན་ཅིག་ཤིང་ཆེན་གྱི། ལོ་མ་དག་ལ་ཕུངས་པར་གྱུར། 46

མི་བདག་ཤིང་ལ་བབས་གྱུར་ཏེ། དཔལ་ཞོོན་ནས་གཤེགས་པར་གྱུར།
བླང་ལོ་ནགས་སུ་འཁྱམས་བྱུང་པས། བླང་མོ་ལ་ནི་འཁྱུད་པ་ཐོོབ། 47

དེ་འོག་བླང་ཆེན་འདོད་པ་ཞེ། ཉིན་ཞག་བདུན་གྱི་འོོད་པའི་སར།
རང་ཉིད་མངོོན་དུ་འོོངས་ཤིང་ཆགས། བཟའ་བ་མངོོན་པར་འདོོད་ཅིང་གནས། 48

བསླབ་པས་བསྟམས་པའི་དབང་བྱུང་ཅིང་ རང་ཉིད་འོོངས་པ་དེ་མཐོོང་ནས།
མཁས་པ་ཤེས་དུ་དགའ་བ་ཡི། ཀུན་དུ་བགྱིད་ཀྱིས་བྱོལ་ལ་སྨྲས། 49

ཚགས་པའི་ཞགས་པས་བྱངས་བྱུང་ཅིང་། འདོོད་པས་གཟིར་ནས་རབ་སོོང་གང་།
བསླབ་པ་དག་དང་མི་འགལ་བར། བླང་ལོ་འདི་དེ་རང་ཉིད་འོོངས། 50

शरीरश्रमशिक्षायां दमकाः कुशला वयम् ।
मनोनियमशिक्षायां मुनयोऽपि न पण्डिताः ॥ ४३ ॥

रागाद्गणितायासः स्खलितालीलसंयमः ।
एष धावत्यमार्गेण मूर्खः खल इव द्विपः ॥ ४४ ॥

दक्षशाखां समालम्ब्य त्यजेमं पृथिवीपते ।
व्यसनी पतितः सत्यं पातयत्येव दुर्जनः ॥ ४५ ॥

संयातस्य वचः श्रुत्वा तत्कालसदृशं नृपः ।
तेनैव सहितः शाखामालम्बे महातरोः ॥ ४६ ॥

अवतीर्य्य तरोरश्वमारुह्य नृपतौ गते ।
प्राप्यालिलिङ्ग करिणीं विगाह्य गहनं गजः ॥ ४७ ॥

ततः शान्तस्मरो हस्ती दिनैरभ्येत्य सप्तभिः ।
स्वयमालानसंबद्धस्तस्थौ भुक्त्वा यथासुखम्[१] ॥ ४८ ॥

शिक्षासंयमयन्त्रितं तं दृष्ट्वा स्वयमागतम् ।
संयातः कौशलोत्कर्षहर्षात् राज्ञे न्यवेदयत् ॥ ४९ ॥

रागवागुरयाकृष्टः प्रययौ यः स्मरातुरः ।
शिक्षायामविसंवादी सोऽयं प्राप्तः स्वयं गजः ॥ ५० ॥

---

१ Orig. स्वयमालानसिलक्तस्तस्थौ कचललापः ।

བདོ་དང་ལྡན་པའི་དབང་གྱུར་གཟིགས། ཐ་ལ་ཀྱི་སའི་རོ་ཤེས་པ།
ཤིན་དུ་ཚ་བའི་ལྷགས་ཀྱི་ཟས། འཇིམ་ཉིང་དུལ་བ་དག་དུ་གནས། 51

འདི་ནི་འདོད་པའི་རོ་ཡིས་བྱངས། ཀུན་དུ་སྤྲུག་བསྔལ་རོ་ཡིས་བྱངས།
འདོད་པའི་རིམ་ནི་རབ་ཞི་ནས། ཕྱི་ནས་ནོར་དུ་གནས་པ་ཐོབ། 52

ལྷ་གཅིག་སེང་གེ་སྐྱག་དང་ནི། བྲང་ཡོ་ལ་སོགས་འདུལ་བར་ནས།
ཚགས་པའི་ཚང་གིས་མྱོས་པའི་ཡིད། ཡུལ་ལ་མངོན་པར་ཕྱོགས་པ་མིན། 53

དེ་དག་ཐོས་ནས་ས་སྐྱོང་གིས། དེ་དེ་བཞིན་ཞེས་བསམས་ནས་སྨྲས།
ཀུན་དུ་བགྲོད་ཁྱོད་བདེན་པ་དང་། རིགས་པ་དཀའ་དུ་བརྩོད་པ་ཡིན། 54

རབ་ཞི་ཚུལ་ཁྲིམས་གང་དག་གིས། སེམས་ཀྱི་གཉེན་འགྲུང་མྱོས་པ་ནི།
སྟོམ་པའི་ཐག་པས་བཏགས་གྱུར་པ། འཇིག་རྟེན་འདི་ན་འགའ་ཡོད་དམ། 55

དེ་སྐད་སྨྲས་ཆེ་ཀུན་དུ་བགྲོད། ལྷ་ནི་བཞུགས་པས་དེ་ལ་སྨྲས།
ལྷ་གཅིག་འགྲོ་བའི་ཉོན་མོངས་ནོམས། མ་ལུས་འཇོམས་པ་ལ་བརྩོན་ཞིང་། 56

ནོམ་པར་རིག་ལྡན་འཇིག་རྟེན་ན། འབད་པས་ཚགས་བྱལ་སྐྱེད་པ་ཡོད།
ཞི་དང་ཆོག་ཤེས་དྲི་མ་མེད། རབ་རྟོགས་སངས་རྒྱས་ཁོ་ནའོ། 57

དེ་ལྟར་སངས་རྒྱས་མཚན་ཐོས་པས། སྐྱེ་བ་སྣར་སྐྱེས་གོམས་པ་ལས།
ཡང་དག་རྫོགས་པའི་བྱང་ཆུབ་སེམས། རྒྱལ་པོ་ཡི་ནི་སྨོན་ལམ་སྐྱེས། 58

सङ्केतयन्त्रितो वश्यो रसज्ञः शल्लकीभुवाम्।
सन्तप्तलोहकवलं गृह्णाति विनये स्थितः ॥ ५१ ॥

एष कामरसाकृष्टः कष्टां विकृतिमाययौ।
पुनः प्रकृतिमापन्नः प्रशान्तमदनज्वरः ॥ ५२ ॥

शक्या दमयितुं देव सिंहव्याघ्रगजादयः।
नतु रागासवक्षीवं[1]-विषयाभिमुखं मनः ॥ ५३ ॥

एतदाकर्ण्य भूपालस्तत्तथेति विचिन्तयन्।
उवाच सत्यमुचितं संयात कथितं त्वया ॥ ५४ ॥

अप्यस्ति कश्चिल्लोकेऽस्मिन् येन चित्तमदद्विपः।
नीतः प्रशमशीलेन संयमालानलीनताम् ॥ ५५ ॥

इत्युक्ते देवताविष्टः संयातस्तमभाषत।
देव सन्ति जगत्क्लेशनिःशेषोन्मूलनोद्यताः ॥ ५६ ॥

विवेकालोकिता लोके वैराग्यजनिताग्रहाः।
शमसन्तोषविषदा बुद्धा एव प्रबोधिनः ॥ ५७ ॥

इति बुद्धाभिधां श्रुत्वा सम्यक्सम्बोधिचेतसः।
राज्ञः प्राग्जन्मजाभ्यासप्रणिधानमजायत ॥ ५८ ॥

---

१ Org. क्षीवि।

འཁོར་བ་ཆུ་སྲིན་འབྱུང་གནས་སྐུ། རྣམ་པར་བྱངས་པའི་འགྲོ་བ་འདི།
དག་བའི་ལམ་ནས་ཇོགས་པ་ཡི། བྱང་ཆུབ་གྲོལ་བར་ཡང་དག་བསྐྱལ། 59

དེ་ནས་དེ་ལ་ནམ་མཁའ་ལས། གཙང་མ་རིས་ཀྱི་ལྷ་ཡིས་སྨྲས།
ཡང་དག་ཇོགས་པའི་བྱང་ཆུབ་དུ། ས་བདག་མངོན་པར་འཚང་རྒྱ་འགྱུར། 60

དེ་སྐད་དེ་ཡི་ཚེག་ཐོས་པས། གྲོལ་པོ་རྟུལ་བྷལ་རྣམས་ཀྱི་མཆོག།
སྐྱེ་བ་དྲན་ཞིང་ལྷ་མིག་ལྡན། བྱང་ཆུབ་སེམས་དཔའ་ཉིད་དུ་གྱུར། 61

དེ་ནས་དེ་ནི་སྟེང་སྨོན་སེམས་ཡངས་ལྡན་མིག་ནི་དེ་ཉིད་དག་ལ་གཏད།
སྲིད་པའི་ཆུ་གཏེར་བྱིད་བའི་འབྱུང་པོ་ཀུན་ལ་རྗེས་སུ་བརྩེ་ལྡན་ཞིང་།
ཡང་དག་རིག་པ་སྒོམ་པ་དང་ལྡན་མངོན་པར་གསང་བ་བསྒེད་པ་ལས།
སེམས་ཅན་རྣམས་ནི་ཡང་དག་བསྐལ་ཕྱིར་དག་བའི་ལམ་དག་བགྲོས་པར་གྱུར། 62

ཞེས་པ་དག་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི
རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་རབ་གསལ་
གྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དང་པོའོ།། ॥

विनिमज्जज्जगदिदं संसारे मकराकरे।
सन्तारयेयं सम्बोधिमुक्तः कुशलसेतुना ॥ ५९ ॥

अथोचुर्देवता व्योम्नस्तं श्रुत्वावासकायिकाः।
सम्यक्सम्बोधिसम्बुद्धो भविष्यसि महामते ॥ ६० ॥

इति तद्वचनं श्रुत्वा राजा विरजसां वरः।
जातिस्मरो दिव्यचक्षुः प्रययौ बोधिसत्त्वताम् ॥ ६१ ॥

अथ स विपुलसत्त्वस्तत्त्वनिक्षिप्तचक्षुः
भवजलनिधिमज्जत्सर्व्वभूतानुकम्पी।
अभवदभिनवोद्यत्संविदुत्साहयोगात्
दलितकुशलसेतुः सत्त्वसन्तारणाय ॥ ६२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां प्रभासावदानं नाम प्रथमः पल्लवः समाप्तः ॥

Chapter II.

ཡལ་འདས་གཉིས་པ་

དཔལ་གྱི་སྟེའི་རྟོགས་པ་བརྗོད་པ།

གང་ཞིག་བཅད་བདར་བསྒེགས་པས་ཀྱང་། གཞན་གྱི་དོན་ལ་བསྒྲུ་མེད་པ།
འགྲོ་འདིར་བསོད་ནམས་ཙོན་དགའ་བྱེད། ཀོང་འཕྱང་དེ་དག་ཀྱོལ་གྱུར་ཅིག། 1

ཨ་རི་ཀྲ་ཞེས་བྱ་བའི་གྲོང་། ཡོན་དུན་ཆོགས་ཀྱི་བཀང་བྱ་བ།
འབྲོན་རྒྱབས་བྱོན་གྲོང་ཁྱེར་ནི། གང་ལས་བརྒྱང་བམིན་པ་ཡོད། 2

དེར་ནི་ས་སྐྱོང་བྱང་གྱུར་པ། དཔལ་གྱི་སྟེ་ཞེས་མོམ་པར་གྲགས།
ཡོན་དུན་རིན་ཆེན་ཆོགས་མོམས་ཀྱི། འབྱུང་གནས་རིན་ཆེན་འབྱུང་གནས་བཞིན། 3

གཞན་ལ་ཕན་པའི་ནུས་པ་ཆེན། གང་གི་མཐུ་ཡིས་ཕྱོགས་མོམས་ཀུན།
རྗེས་སུ་ཆགས་ཤིང་མཇོས་གྱུར་པ། ཉི་མ་ཡི་ནི་ངོ་ཀྱིས་བཞིན། 4

སྡུག་བསྔལ་བྱེད་པའི་དྲི་བཟང་ཆེན། འབྱོར་པ་དཀར་བའི་གྲགས་པ་དང་།
གྲུང་པོ་གང་གིས་འགྲོ་བ་དག། མཇོས་པ་དཔག་བསམ་ལྗོན་པ་བཞིན། 5

སྐྱེ་ཀུའི་བསོད་ནམས་ཀྱིས་བསྐྱེས་གང་། སྐུ་ཚེལ་གནས་ཀྱང་དྲང་པོར་གྱུར།
དྲང་པོར་གྱུར་ཀྱང་བློ་བྲེས་ཆེ། བློ་ལྡན་གྱུར་ཀྱང་སྐུ་བྱེད་མིན། 6

द्वितीयः पल्लवः ।

श्रीसेनावदानम् ।

ते जयन्ति जगत्यस्मिन् पुण्यचन्दनपादपाः ।
छेदनिर्घर्षदाहेऽपि ये परार्थेषु निर्व्यथाः ॥ १ ॥

गणनीया गुणगणैरस्त्यरिष्टाभिधा पुरिः ।
स्पर्धया शक्रनगरी यस्या न स्यान्नरीयसी ॥ २ ॥

तस्यां बभूव भूपालः श्रीसेन इति विश्रुतः ।
समग्रगुणरत्नानां रत्नाकर इवाकरः ॥ ३ ॥

परोपकारशक्तस्य चतुरस्य[1] प्रभावतः ।
अनुरक्ता दिशः सर्व्वाः सूर्य्यस्येव प्रभावतः ॥ ४ ॥

यशोभिः शोभितं येन घनदानसुगन्धिभिः ।
गजैश्च भूतिधवलैर्जगत्कल्पद्रुमैरिव ॥ ५ ॥

कलालयोऽपि शरलः शरलोऽपि महामतिः ।
स बभूव प्रजापुण्यैर्मतिमानप्यवञ्चकः ॥ ६ ॥

---

१ Org. चतुर्यस्य ।

ཇི་སྲིད་ཚ་ཟེར་གྱིས་གདུངས་དང་། ཇི་སྲིད་རླུང་ནི་སྐྱེད་བྱེད་པ།
དེ་སྲིད་གང་གི་བཀའ་དང་ནི། གྲགས་པར་རབ་དུ་གཞེས་མེད་གྱུར། 7

མཆུངས་པ་ངལ་ཞིང་མཁས་པ་དང་། ཡོན་ཏན་དྲུག་ཤེས་མིག་དང་ལྡན།
བློན་པོ་ལྷོང་ཐུག་བཅུ་གཏེར་ཀྱིས། གང་ཞིག་ཡོངས་སུ་ཉེ་བར་བསྟེན། 8

ཚོར་གཅོད་འཇོམ་པའི་བྱ་ལ་པོ་དེར། སྐྱེ་བོ་ལེགས་བྱས་ལྷན་པར་གྱུར།
སྐྱེ་གྲི་རྩེ་དང་ཡོན་ཏན་གྱིས། མཆུངས་པ་ཁོ་ན་བྱད་མེད་བཞིག། 9

དེ་ཡི་བསོད་ནམས་དབང་གིས་ནི། སྐྱེ་བོ་མཐོ་རིས་འགྲོ་བ་ཡི།
གཞལ་མེད་ཁང་གི་བསྒྱུ་བྱེད་གྲོང་། ལམ་དང་བྲལ་བར་རབ་དུ་བྱེད། 10

ལྷ་ཡི་འཇིག་རྟེན་དག་དུ་མིའི། འཇིག་རྟེན་ཡང་དག་ཞུགས་མཐོང་ནས།
སར་བདག་ལ་ནི་ཁྲོ་བ་དག། སྐྱེས་དེ་མཚོད་སྤྲིན་བསྒྱུ་བས་བསམས། 11

ཀྱེ་མ་སྐ་སྤྱོད་དཔལ་གྱིས་སྡེས། ཤིན་དུ་སྤྲིན་བར་བྱེད་པ་དང་།
དགེ་བའི་ཁྲིམས་ཀྱིས་སྐྱེ་གྲི་ནོམས། བདག་དང་མཆུངས་པར་རབ་དུ་བཀོད།* 12

---

* ཅེ་མ་ས་སྤྱོད་དཔལ་ཞི་ སྡེས་ལོགས་ཤི་ ཤོ་ཁོ་ཀ་ཁཅིག་པོ་ ཉིད་འི་རྩ་སྐད་ མ་དཔེ་ཆོར་ ཆད་པ་དབང་པོ་རེ་རྡེ་ སྟེབ་སྤྱོར་རྩ་ཟ་ཅོར་ཞི་ བཅ་དེས་ བསྟེགས་པ་སྒར་ཚུ་དཔེ་ཆེད་ཅ་ ཉཐར་

i. e., "Kye-ma sa-*spyod dpalgyi sde*, &c. This single śloka was destroyed in the original Indian language MS. A *Bande* of Ssahor recomposed it in the metre of *Dwan-po rdorje* (Indra Vajra). Insert the śloka hereafter from the Indian copy if obtained."

The Bande (Buddhist Pandit) seems to have translated the Tibetan version of the śloka word for word into Sanskrit. Reversing the order of that version we have: *Sde dpal-gyi Sa-spyod kyema*, &c., the Sanskrit equivalent of which, word for word, is—**सेनेन लक्ष्मी वसुधेषु चारस्साश्चर्य्य** &c.

यावत्तपति तिग्मांशुर्यावद्वहति मारुतः।
तावदाज्ञा च कीर्त्तिश्च यस्याप्रतिहताभवत् ॥ ७ ॥

समव्यायामविदुषां षड्गुणज्ञानचक्षुषाम्।
यं द्वादशसहस्राणि मन्त्रिणां पर्य्युपासते ॥ ८ ॥

तस्मिन् धर्म्मपुरे राज्ञि बभूव सुकृती जनः।
भर्त्तृतुल्या भवन्त्येव गुणैस्त्रिय इव प्रजाः ॥ ९ ॥

तस्य पुण्याधिवासेन[1] जनास्त्रिदिवगामिनः।
विमानैः शक्रनगरीं निःसञ्चाराः प्रचक्रिरे ॥ १० ॥

दृष्ट्वा मनुजलोकेन सुरलोकसमाहृतिम्।
जातवैरः क्षितिपतौ शतक्रतुरचिन्तयत् ॥ ११ ॥

सेनेन लक्ष्मी वसुधेषु चार-
स्याश्वर्य्यकर्त्तव्य च दत्तनित्यम्।
कल्याणशीलेन च सर्व्वचेत-
न्यप्रव्यहासामन अस्मकाश्च[2] ॥ १२ ॥

---

१ Org. पुण्यापिवासेन।
२ See foot-note, page 22.

བདག་གི་སྐྱེ་མ་བསྐྱེལས་ནས་ནི། སྨིན་བའི་སྐྱིང་སྟོབས་མཐུ་ལྡན་ཞིང་།
སེམས་ནི་ཉམས་པ་མེད་པ་དེའི། བདེན་པ་རབ་ཏུ་བརྟག་པར་བྱ།* 13

དེ་ལྟར་ཡུན་རིང་ནོམ་བསམས་ནས། བཀྱེ་བྱིན་གཟུགས་ནི་གཞན་བསྐྱུར་ཏེ།
རྩེས་འབྲང་ལྟ་ནི་ཉང་ངུ་དང་། མི་ཡི་འཇིག་རྟེན་དག་ཏུ་ཞུགས། . 14

སྐབས་དེར་བློ་བཟང་བློན་པོ་ནི། བྱ་ལ་སྨིད་སྐྱང་བའི་བྲམ་ཟེས།
སྐྱེ་གཤེའི་བྷ་ག་ཙོ་བོར་ནི། ཡོངས་རྫོག་མི་ཡི་བདག་ལ་སྨྲས། 15

བྱ་ལ་པོ་བྱ་ལ་སྨིད་མཛེས་ལྡན་ཞིང་། དུལ་བྲལ་ཟེལ་མེད་སྨིན་བྱེད་པ།
ཁྱོད་ཀྱི་སྐབས་གསུམ་དབང་ཕྱུག་ནི། ཐམ་པར་བྱས་པས་ངོ་ཚར་བྱུས། 16

གཞན་གྱི་ཡོན་དམ་རྫོགས་པ་དང་། བདག་ཉིད་དེ་ལས་དམན་པ་ནི།
མཐོང་ནས་ཐུག་དོག་ནོམ་འཕྱལ་དག། ངེས་པ་ཁོ་ནར་ཅིས་མི་འབྱུང་། 17

ཆེན་པོ་ནོམས་ཀྱི་ལེགས་བྱས་ལའང་། ཁྱད་འཕགས་གཞན་ལ་འབྱན་པའི་མེ།
བསྟེན་པའི་སྐྱེ་བོ་ཐུག་དོག་ཅམ། ཐལ་ཆེར་གདུང་བས་ཉེན་པར་འགྱུར། 18

སྨིན་ལ་གཅགས་པ་ཁྱོད་ཀྱི་ནི། ཤོར་ཀུན་སྨིན་པ་ལྷགས་སུ་བྱུར།
བྱ་དང་ཆུང་མ་བདག་ཉིད་ཀྱང་། སྨིན་བསམ་ཐུབ་ཚོར་ཤིན་དུ་ཆེས། 19

---

* སྐྱེས་པའི་སྐིང་སྟོབས་མཐུ་ལྡན་ཞིང་ ཤེས་པའི་ རྣམ་རིག་པོ་ འདི་ཉི་ སྐད་དོད་ མི་འཇིག་པ་ སངས་པ་ཐཞན་ཆམས་དང་མཐུན་པར་ལ་ སྐོ་ལང་མའི་ རྩེས་སྐོར་རྣ་འདར་ ལོས་བཀོད་པ་ཅི་ དཔེ་ཆེད་ཅ་འཐུར་

i. e., "*S*byin-pa*h*i *s*ñi̱n *s*tob*s* *m*thu *l*dan shiṅ. The Sanskrit equivalent of this half-line was lost. Lochava (interpreter) *H*dor recomposed it conformably to the sense of the other half-lines of the śloka, in the metre of La *s*go yaṅ-ma. Insert here the equivalent from the Indian copy if obtained."

तस्याखण्डितचेतसः दृङ्निदल्यानुभावपाम्[1]।
कर्त्तव्या धैर्य्यजिज्ञासा मया मायाविधायिना ॥ १३ ॥

इति सञ्चिन्त्य सुचिरं सर्व्वैरनुगतः सुरैः।
रूपं शक्रः पराहृत्य मर्त्यलोकमवातरत् ॥ १४ ॥

अथान्तरे प्रजाकार्य्यपर्य्यालोचनतत्परः।
राज्यरक्षागुरुर्मन्त्री नृपमूचे महामतिः[2] ॥ १५ ॥

राजन् विरजसा राज्य-राजमानेन निर्जितः।
निर्व्याजदानैर्भवता लज्जति चिद्गणेश्वरः ॥ १६ ॥

परस्य पूर्णगुणतामात्मनस्तद्विहीनताम्।
दृष्ट्वा को नाम नायाति मात्सर्य्यस्य विधीयताम् ॥ १७ ॥

ईर्षालवः परोत्कर्षसंघर्षस्य युषो जनाः।
प्रायेणोद्वेगमायान्ति महतां सुकृतेष्वपि ॥ १८ ॥

सर्व्वस्वदानमर्य्यादादानव्यसनिनोऽस्तु ते।
पुनदारात्मदाने तु संकल्पो ह्यतिसाहसः ॥ १९ ॥

---

१ See foot-note, page 24.

२ Org. नृपमूढ़महामतिः।

གང་གིས་འགྲོ་བའི་གཙུག་གི་ནི། ནོར་བུ་ཉམས་བྱེད་རབ་བཙོད་པ།
ཤིན་དུ་དྲག་ཅིང་འཇིགས་པའི་ཀྱུ། མི་བཟང་ལྷི་ལམ་དེ་དེ་མཐོང་། 20

ནོམ་ཤེས་དེ་ཉིད་སྨྲ་བ་ནོམས། སར་སྐྱོང་སྐུ་ལྷས་སྨིན་པ་ནི།
བགྱིད་པར་འགྱུར་ཞེས་བཤོག་དཀའི་གཏམ། རབ་དུ་སྨྲ་བ་དག་ཀྱང་ཐོས། 21

ལྷས་ཀྱི་སྨིན་པ་སྨོང་བའི་ཚོགས། ཀུན་གྱི་འབྲས་བུ་མེད་པའི་ཀྱུ།
དཔག་བསམ་སར་སྐེས་གནས་པ་ནི། ཀུན་ལ་རབ་དུ་བྱིན་གྱུར་ཉིད། 22

དེ་ཕྱིར་ས་སྐྱོང་ཁྱོད་ཀྱི་ལྷས། འགྲོ་བ་བསྡུང་བའི་རིམ་ཅན་ཕྱིས།
སྐྱེ་གྱུའི་དབང་གྱུར་གཏོང་བ་ཡིས། ཐུབ་ཆོད་འདི་ལ་དགྱེས་བྱལ་མཛོད། 23

བློན་པོའི་མཆོག་གིས་སྨྲས་པ་ནི། ཐོས་ནས་ནོར་འཛིན་བདག་པོ་ནི།
སྐྱིང་སྟོབས་དཀར་འཇུམ་ཀྱིས་བཀྲུས་པའི། མཆུ་མཛེས་ལྷན་པས་དེ་ལ་སྨྲས། 24

བློན་པོ་ཆེན་པོ་ཁྱོད་ཀྱིས་ནི། བློན་པོར་འོར་ཤིང་ཕན་པ་བཙོད།
འོན་ཀྱང་སྨྲོང་སྐྱེ་ཕྱིར་སྟོག་པས་པའི། གཏུང་བ་བདག་གིས་ཡོངས་མི་བཟོད། 25

སྨྲང་ཞིག་ཅེས་ནི་བཙོད་བ་ལ། དགག་པའི་ཡེ་གེ་ཙུ་མོའི་ཚོགས།
གང་གི་ཁ་ནས་མོམ་པར་ཀྱུ། དེ་དག་གསོམ་པོ་སྟོག་སོང་ཡིན། 26

འདི་ལས་འདི་ནི་ཐོག་འགྱུར་ཞེས། སྐྱིང་ལ་བཟུང་ནས་སྨྲོང་བ་ཡི།
འདོར་བ་གང་ལས་ཕྱིར་ཕྱོགས་ཤིང་། དེ་ཡི་འགྲོ་བ་གསོན་པས་ཅི། 27

दृश्यन्ते दारुणास्ते ते स्वप्नाः साध्वसहेतवः।
जगतः स्रुच्यते तीव्रं यैश्चूड़ामणिखण्डनम् ॥ २० ॥

देवज्ञानां प्रवादश्च श्रूयते तत्त्ववादिनाम्।
शरीरं पृथिवीपालो दास्यतीति सुदुःसहः ॥ २१ ॥

शरीरदानं सर्व्वार्थिसार्थनैष्फल्यकारणम्।
सर्व्वप्रदे भवत्यवतिष्ठन् कल्पमहीरुहः ॥ २२ ॥

तस्मादस्मान्महीपाल विरम त्यागसाहसात्।
रक्षारत्नं हि जगतः प्रजायत्तं वपुस्तव ॥ २३ ॥

इति मन्त्रिवरेणोक्तमाकर्ण्य वसुधाधिपः।
तमूचे सत्त्वधवलस्मितधौताधरद्युतिः ॥ २४ ॥

उक्तं हितं महामात्य भवता सचिवोचितम्।
किन्त्वर्थिजनवैमुख्यसन्तापं नाहमुत्सहे ॥ २५ ॥

देहीति वादिषु गिरौ[1] निषेधपरुषाक्षराः।
स्फुरन्ति वचने येषां सजीवास्ते गतासवः ॥ २६ ॥

इदमस्मादवाप्स्यामीत्याधाय हृदि याचकः।
प्राप्तः प्रयाति वैमुख्यं यस्मिन् किं तेन जीवता ॥ २७ ॥

---

१ गिरौ ?

སྡུག་བསྔལ་སྐྱེ་བོ་གང་དག་གི། གདུང་བ་ཐོས་པས་ཡིད་བསིལ་ཞིང་།
སྙིང་རྗེ་མེད་པའི་བདག་ཉིད་ཅན། བསོད་ནམས་ཞན་དེའི་སྐྱེ་བ་སྨད། 28

འགའ་ཞིག་དུ་ནི་འགའ་ཞིག་ཚོ། གང་ཞིག་འགའ་ལ་ཕན་པར་འགྱུར།
དེ་དོན་ལེགས་པ་རྣམས་ཀྱི་ལུགས། འདི་ནི་གཉིད་པར་བཅས་ཀྱང་དགའ། 29

མི་བདག་སྙིང་སྟོབས་ལྡན་པའི་ཚོགས། དེ་སྐད་ཐོས་ནས་ཟློག་པོ་ཞེ།
གཡོ་བ་མེད་པར་འགྱུར་རོ་ཞེས། བསམས་ནས་ཅི་ཡང་མི་སྨྲའོ། 30

དེ་རྣམས་ནམ་ཞིག་ས་ཡི་རྡེ། རོལ་ཅིང་རྣམ་པར་གནས་པ་དེའི།
བཙུན་མོ་ཀུན་ལ་བའི་འོད་ཟེར་པ། དགའ་མའི་པདྨ་མོའི་དགའ་མ་བཞིག། 31

མཛེས་མ་སེམས་ཀྱི་རི་དགས་ཞགས། འཆད་ལ་མཁས་པའི་ཐབ་པ་ནི།
རིང་ནས་རང་དགར་འོངས་གྱུར་པ། མིག་ནི་འཇུམ་བླལ་འཛིན་པས་མཐོང་། 32

སྐྱེ་བ་སྔ་མ་གཞན་དག་ཀྱ། འབྲེལ་ཞིང་མཛའ་བས་འདྲིས་པ་བཞིག
དེ་མཐོང་དེ་ཡི་འཛིན་པ་དང་། བཏོན་པའི་ཕྱང་བོ་གཅོར་མ་གྱུར། 33

དེ་ཡི་ཡིད་ནི་ཆགས་བླལ་ཡང་། བག་ཆགས་ཀུན་ནས་ལངས་གྱུར་ཅིང་།
དངོས་ལས་ཕྱིར་ཕྱོགས་བཏང་གྱུར་ཀེ། མངོན་པར་འདོད་པའི་སེལ་ཡིས། 34

གང་ཕྱིར་སྡོག་ཆགས་ཐམས་ཅད་ཀྱིས། སྐྱེ་བ་སྔར་གོམས་པག་ཆགས་ནི།
ཀུན་དུ་དགའ་བའི་སྐུད་པ་ཡིས། དཀ་དུ་བཅོམས་འདི་མེད་མི་འགྱུར། 35

धिग्जन्म पुण्यहीनस्य तस्य निष्करुणात्मनः।
यस्यार्त्तजनसन्तापश्रवणे शीतलं मनः ॥ २८ ॥

एतदर्थमयं कायः सापायोऽपि सतां प्रियः।
यत्कस्यचित् क्वचिद् याति कदाचिदुपकारताम् ॥ २९ ॥

श्रुत्वेति नृपतेर्वाक्यममात्यः सत्त्वशालिनः।
नोवाच किञ्चिदचलां विचिन्त्य भवितव्यताम् ॥ ३० ॥

ततः कदाचिद् भूभर्त्तुस्तस्य लीलाविहारिणः।
जायां जयप्रभां नाम रतिं रतिपतेरिव ॥ ३१ ॥

दूराद् यदृच्छयायातां चित्तसारङ्गवागुराम्।
मुनिरध्यापकः कान्तां ददर्श विनिमेषदृक् ॥ ३२ ॥

प्राग्जन्माभ्याससम्बन्धस्नेहात् परिचितामिव।
तां दृष्ट्वा स धृतेः प्राप धैर्य्यराशिरनीशतां ॥ ३३ ॥

तस्य वीतस्पृहस्यापि वासनोल्लसितं मनः।
उत्सृज्य भववैमुख्यमभिलाषभुवं ययौ ॥ ३४ ॥

इयं हि सततस्यूता सन्ततप्रीतितन्तुभिः।
नापैति सर्व्वजन्तूनां प्राग्जन्माभ्यासवासना ॥ ३५ ॥

དེ་ནི་གནས་སུ་འངོས་པ་ལ། ཡོན་ནི་བློང་པར་མཛོད་ཅག་ཅེས།
ཀློག་པའི་བདུལ་ཞུགས་ཡོངས་རྫོགས་པའི། སྨོན་མ་བྱས་ཟིའི་ཁྲེའུ་སྨོས། 36

དེ་ལ་དེས་སྨོས་མཉེས་གཤིག་དག། ནགས་སུ་བདག་ལ་ནོར་མི་དགོས།
འོག་ཀྱང་སྐྱིང་ནས་གུས་པ་ན། གང་ཞིག་མངོན་པར་འདོད་པ་ཉིན། 37

ས་པདག་དཔལ་སྦ་ལི་ཚུ་མོ་ནི། བྱོལ་བའི་འོད་དེ་གལ་ཏེ་ན།
ཁྱོད་ཀྱིས་སྨྱིན་དུ་ཐོབ་པ་ན། འདི་ནི་བདག་གི་ཡོན་དུ་འགྱུར། 38

དེ་རྐང་ཟླ་མས་བརྩོད་ཐོས་ནས། སྨྲོས་མའི་ཡིད་ནི་རབ་དུ་འདར།
མི་ཐོད་བསྐང་ན་ཆེད་པ་ལ། ཐེ་ཚོམ་ཀུན་དུ་འཁྲུགས་པར་གྱུར། 39

དེ་ནི་སྨྲོང་ནོམས་རང་འདོད་བཞིན། དཀ་དུ་གཏངས་པའི་སྐོར་སོང་ནས།
ས་སྐྱོང་ནོམས་ཀྱི་གཙོ་བོ་ཡི། ཁང་པར་ཡིད་ཆེས་ཞན་པས་ཞུགས། 40

མི་འཐོབ་དོགས་སྨྲོང་ཞུམ་པ་ཡི། བསམས་པས་ཡིད་ནི་མི་གཡོ་ཞིང་།
ཤིན་དུ་སྐྱེས་ལས་གདོང་བདུད་དེ། ས་ལ་དོག་ཅིང་ཁྲ་བ་བཞིན། 41

སྨྲོང་བ་འོང་པ་དེ་མཐོང་ནས། ས་བདག་རབ་དུ་དགྱེས་པར་གྱུར།
བདུད་ཆོ་རབ་སྨྱིན་ཆས་པ་ཡི། ཆུ་གཏེར་ཡང་དག་བྱོས་གྱུར་བཞིན། 42

ཁྱོད་ཀྱི་འདོད་པ་ཅི་ཞིག་ཅེས། བརྩེད་ནས་ས་ལ་སྨྱོད་པས་མཆོད།
འོས་པ་མིག་བརྩེད་ངོ་ཚ་ཞིང་། ཡི་གེ་འཁྱམ་པར་དེ་ཡིས་སྨྲས། 43

तमाश्रमपदं प्राप्तः समाप्ताध्ययनव्रतः।
शिष्यो माणवकं प्राह दक्षिणा गृह्यतामिति ॥ ३६ ॥

स तमूचे न मे वत्स वने वृत्तिः प्रयोजनम्।
तथापि यदि निर्बन्धः श्रूयतां यद्भीप्सितम् ॥ ३७ ॥

श्रीसेनस्य क्षितिपतेर्यदि देवी जयप्रभा।
लभ्यते भवता दातुं तदसौ मम दक्षिणा ॥ ३८ ॥

इत्युक्तं गुरुणा श्रुत्वा शिष्यः कम्पितमानसः।
अशक्यप्रार्थनालाभे संशयाकुलितोऽभवत् ॥ ३९ ॥

स गत्वा सततस्वेच्छाविवृतद्वारमर्थिनां।
विवेश स्वैरविश्रम्भभवनं भूभृतां प्रभोः ॥ ४० ॥

अलभ्यार्थार्थनादैन्यचिन्तातिक्लिष्टमानसः।
नम्राननोऽतिवैलक्षात् वीक्षमाण इव क्षितिम् ॥ ४१ ॥

तं दृष्ट्वार्थिनमायातं प्रहृष्टोऽभूत् महीपतिः।
सुधाप्रदानसन्नद्धसमुद्भूतिरिवाम्बुधिः ॥ ४२ ॥

किन्तवेप्सितमित्युक्ता पूजितः स महीभुजा।
उवाचानुचिताख्यानवैलज्जस्खलिताक्षरः ॥ ४३ ॥

---

१ Org. प्रार्थ। २ Org. °चिन्तातिमानसः।

ཁྱོད་ཀི་སྨོང་པའི་དཔག་བསམ་ཤིང་། སྔོན་ཚད་གཞན་གྱིས་མ་བསྐངས་ཤིང་།
ཤིན་ཏུ་རྣེ་དཀའི་གནས་དེ་ཡང་། ཐུབ་མའི་དོན་དུ་བདག་སྨོང་གྱུར། 44

བདག་གི་རིག་པའི་བདུལ་ཞུགས་རྟོགས། སྨོབ་དཔོན་མངོན་པར་འདོད་བའི་ཡོན།
གྱུལ་པོ་ལྟ་མོ་གྱུལ་བའི་ངོད། གལ་ཏེ་ཐོད་ན་གནང་བར་མཛོད། 45

ཐུབ་པའི་སྨོབ་མས་དེ་བརྟོད་པའི། འཕྲལ་ཉིད་ས་ཡི་བདག་པོ་ལ།
མཛའ་དང་སྨིན་པའི་རོང་གཅགས་པ། ནམ་པ་གཉིས་ཤིག་བྱང་བར་གྱུར། 46

སོ་ཡི་འོད་ཟེར་མདུན་དགྲིགས་པས། སྐྱིང་དུ་སྐྱག་པའི་བཙུན་མོ་དག།
དཀར་བའི་གོས་ཀིས་གཡོགས་པ་བཞིན། དེ་ཡིས་གཉིས་སྐྱེས་དག་ལ་སྐྱེས། 47

འབྲལ་བས་འཇིགས་པའི་སེམས་ལ་ཡང་། ང་ཡིས་བདེན་པར་མི་རྟོ་ཞིང་།
ནོམ་པར་མི་དབྱད་ཁྱོད་ཀྱི་ནི། ཐུབ་གང་བཞེད་བདག་གིས་སྨྲིག 48

དེ་སྐད་བརྗོད་ནས་གྱུལ་པོ་ཡིས། བཙུན་མོ་ལྷུདའི་སྐུ་ཕྲེང་མ།
དཀག་ཏུ་སྐྱིང་ལ་ཡང་དག་གཅགས། འཆོོ་སྐྱེག་གཞན་པ་ལྟ་བུ་བོས། 49

འབྲལ་བས་གཏུང་བའི་མེ་དག་ནི། ཐུབ་མར་གྱུར་བས་བརྟྲོག་གྱུར་ཅིང་།
མཛའ་བ་ཤིན་ཏུ་འཚེལ་བ་ཡི། འདོད་པའི་གཉེན་གྱིས་བཀག་གྱུར་ཀྱང་། 50

ཐུབ་པའི་སྨོབ་ལ་རབ་ཏུ་བྱིག། འཕྲལ་ལ་རི་དགས་མོ་བཞིན་དུ།
འདོི་ནི་ཅི་ཞེས་ངལ་བ་དང་། སྐྱག་བཅས་མིག་ནི་རིག་རིག་གྱུར། 51

अनर्थितपरः पूर्वमर्थिकल्पतरोस्तव।
गुर्व्वर्थमर्थितां यातः सुदुर्लभपदेऽप्यहम्॥ ४४॥

मम विद्याव्रते पूर्णे दक्षिणाभिमता गुरोः।
राजन् जयप्रभा देवी दीयतां यदि शक्यते॥ ४५॥

इत्युक्ते मुनिशिष्येण सहसैव महीपतेः।
स्नेहदानरसाविद्धं द्विधाभूतमभून्मनः॥ ४६॥

स जगाद द्विजं दन्तज्योतिषाग्रविसारिणा[1]।
गृह्यतां दयिता स्वच्छवाससाच्छादयन्निव॥ ४७॥

अविचार्य्य मया देयमीप्सितं तव यद्गुरोः[2]।
वियोगचकितं चेतः सत्यं न गणयाम्यहम्॥ ४८॥

इत्यक्त्वा हृदयदयितां राजा राजीवलोचनाम्।
सदा हृदयसंसक्तां जीववृत्तिमिवापराम्॥ ४९॥

निवारितोऽपि गुरुणा वियोगव्यसनाग्निना।
निषिद्धोऽप्यतिदृढेन स्नेहेन स्मरबन्धुना॥ ५०॥

प्रददौ मुनिशिष्याय सहसा हरिणीमिव।
किमेतदिति सायाससन्त्रासतरलेक्षणाम्॥ ५१॥

---

5 १ Org. °विवारिणा। २ Org. देवयमीप्सितं तव यत्।

ས་སྦྱོད་གཏོང་བའི་ངང་ཅན་གྱིས། དགེ་མ་བཏང་བར་བྱུང་པ་ཡི།
གཏོང་བས་འཇིགས་པ་བཞིན་དུ་སེ། ཚུ་གཏེར་སྐེ་རགས་གཡོ་ལྡན་འདར། 52

གང་ཕྱིར་ལུས་ལ་གནས་སྐབས་ངན། དབང་པོ་བྲལ་སོགས་ལྟ་རྣམས་ཀྱིས།
བཟོད་དཀའ་དེ་ཡང་བཟོད་བྱེད་པ། དགའ་མ་དེ་ལ་སྡུ་མི་དགའ། 53

ལ་ལའི་ཚུལ་ཁྲིམས་ལ་ལའི་ཏོར། ལ་ལའི་དཀའ་ཐུབ་ལ་ལའི་ཆོས།
ལ་ལའི་ངོ་ཚ་ལ་ལའི་ལུས། བྱད་མེད་ཆེད་དུ་བཏང་བར་བྱུར། 54

སྐྱེས་བུ་རྣམས་ཀྱི་འཆོ་བའི་སྒོག། ཆགས་པའི་ཏོར་ཀུན་གང་དག་ཉིད།
དེ་ཉིད་སེམས་དཔའ་ཆེ་རྣམས་ཀྱིས། སྤྱིན་ལ་སྟོ་ཡི་གཟེགས་མ་བཞིན། 55

དེ་ནི་བྱངས་ནས་སོང་བས་དེ། བྲལ་བས་ཡིད་འབྲུགས་མི་ཡི་བདག།
དགའ་མ་དང་བྲལ་བའི་ལ་སྟང་། ཡིད་འབྱུང་བཞིན་དུ་རབ་དུ་བྱུར། 56

སྒོབ་མས་ས་བདག་ཆུང་མ་ཞི། འཆོ་བ་དང་བྲལ་འཇིག་རྟེན་དག།
ཐ་རོལ་སེར་བགྲོད་བཞིན་བྱུང་ཤིང་། འོང་བ་ཐུབ་པས་མཐོང་བྱུར་ཏེ། 57

འགྲོད་པ་དྲག་པོས་ཡང་དག་གདུངས། མཆོག་དུ་ངོ་ཚས་ཤིན་དུ་ཞུམ།
ལས་ནི་རྣམ་པར་བསྨད་པ་ལས། བདག་ཉིད་རིགས་པ་མིན་པར་བསམས། 58

ཀྱེ་མ་མ་རབས་བྱིས་པ་བཞིན། བདག་གིས་གཡོ་བ་འབའ་ཞིག་ལས།
བླ་གས་པ་རྣམས་བའི་འདམ་དུ་ནི། རོགས་མེད་རང་གིས་བདག་ཉིད་བསྐྱུར། 59

दत्तायास्त्यागशीलिना प्रियायाः पृथिवीभुजा।
चकम्पे त्यागभीतेव भूमिर्लोलाब्धिमेखला ॥ ५२ ॥

यत्कृते दुर्दृशं देहे सेहिरे दुःसहामपि।
इन्द्रचन्द्रादयो देवास्ताः प्रियाः कस्य न प्रियाः ॥ ५३ ॥

शीलं केचिद्धनं केचिद्धर्म्मं केचित्तपः परे।
लज्जां केचित्तनुं केचित्त्यजन्ति योषितां कृते ॥ ५४ ॥

यदेव रागसर्व्वस्वं पुंसां जीवितजीवितम्।
तदेव स्फीतसत्त्वानां दाने तृणलवायते ॥ ५५ ॥

तामादाय गते तस्मिन् विरहाकुलितो नृपः।
विरहिणः सुखद्वेषी मनोभव इवाभवत् ॥ ५६ ॥

शिष्येण मुनिरानीतां दृष्ट्वा भूपतिवल्लभाम्।
रहितां जीवितेनेव परलोकभुवं गताम् ॥ ५७ ॥

गाढानुशयसन्तप्तः परं लज्जानिमीलितः।
अचिन्तयदनौचित्यमात्मनः कर्म्मविप्लवात् ॥ ५८ ॥

अहो नु बालकेनेव मया केवलचापलात्।
निःशङ्कमयशःपङ्के स्वयमात्मा निपातितः ॥ ५९ ॥

བདག་ནི་ཚོས་མིན་བྱེད་པ་ཡིས། རིགས་གནས་བློ་མའི་བཙུན་མོ་ནི།
ཚོས་ཀྱི་སྐྱེ་གཏེའི་མར་གྱུར་འདི། སྡུག་བསྔལ་མེད་ལ་རབ་དུ་གཏད། 60

བདག་གིས་ཚུལ་ཁྲིམས་མ་བསམས་ཤིང་། ཡང་དག་སྒོམ་པ་མ་དྲན་ལ།
ཆགས་དང་བྲལ་ཉིད་མ་རྟོགས་ཤིང་། དབེན་པ་ནམ་པར་མ་བསྟོས་ཅི། 61

ཀྱེ་མ་དོག་དབྱེད་མེད་ནམས་ཡིད། ཡང་དག་སྒོམ་མིན་ཚང་གིས་མྱོས།
ལེགས་པའི་ལམ་ལས་ཕྱིར་ཕྱོགས་ཏེ། འདིར་ནི་གཡང་ས་ཁོ་ནར་ཟྱུག། 62

དེ་ལྟར་བསམས་ནས་ཐུབ་པ་དེ། སྐྱེངས་པས་གཟི་བརྗིད་ཉམས་བྱུང་ཅིང་།
བཞིན་ནི་དམན་པས་མངོན་ཕྱོགས་ཏེ། གྲོལ་བའི་བཙུན་མོ་ལ་སྨྲས་པ། 63

དབུགས་དབྱུང་མཛོད་ཅིག་མ་གཅིག་ཀྱི། མྱ་ངན་བཀྱེ་བར་མི་འོས་སོ།
ངེས་པར་བདག་ནི་ཚུལ་ངན་པས། ཁྱོད་ཀྱི་སྡུག་བསྔལ་འདི་ཉིད་དོ། 64

འཇུག་དོགས་ཤིང་འདིའི་འོག་ཏུ་ནི། ངལ་བའི་གཏུང་བ་བཏང་བྱས་ནས།
ང་དང་ལྡན་ཅིག་རང་ཁྱིམ་དུ། དཔལ་ཉིད་དུ་ཁྱོད་འགྲོ་འགྱུར། 65

ཐུབ་པས་འདི་བཙོང་ལྟ་མོ་ནི། བདུད་རྩིའི་ཚར་གྱིས་བྱིན་པ་བཞིན།
འཇིགས་པའི་ཀུན་རྩོངས་བཏང་གྱུར་ཅིང་། སྲོག་ནི་འཇོམ་པ་རྣམ་པར་གྱུར། 66

གཏོང་བའི་སྤྱོད་པ་མོད་བྱུང་གིས། མཐོ་རིས་ཁྲབ་པ་དེ་ཐོས་ནས།
གྲོལ་བའི་བཟེ བའི་སྐྱིང་སྟོབས་དག། ཤེས་འདོད་ནོར་ལྡའི་བུ་ཉིད་འོངས། 67

इयं प्रजानां जननी धर्म्याणां धर्म्मकारिणा।
वर्णाश्रमगुरोर्जाया मया दुःखानलेऽर्पिता ॥ ६० ॥

किन्तु नाकलितं शीलं न स्मृतः संयमो मया।
गणितं नैव वैराग्यं विवेको नावलोकितः ॥ ६१ ॥

अहोऽच निर्व्विचाराणां सन्मार्गविमुखं मनः।
असंयमासवक्षीवमपथेष्वेव धावति ॥ ६२ ॥

इति सञ्चित्य स मुनिर्वैलक्षक्षपितद्युतिः।
अभ्येत्य राजदयितामुवाच विनताननः ॥ ६३ ॥

समाश्वसिहि हे मातर्न शोकं कर्त्तुमर्हसि।
भवितव्यतायं वायं क्लेशस्ते दुर्नयश्च मे ॥ ६४ ॥

त्यक्ता आश्रमसन्तापमस्य तीरतरोरधः।
अधुनैव निजं धाम सहात्मभिर्गमिष्यसि ॥ ६५ ॥

इत्युक्ते मुनिना देवी सिक्तेवामृतदृष्टिभिः।
अवाप्तजीवितधृतिस्तत्याज भयसम्भ्रमम् ॥ ६६ ॥

श्रुत्वैतत् चिदिवव्यापि दातुश्चरितमद्भुतम्।
राज्ञः सत्त्वदयां ज्ञातुं वासवः समुपाययौ ॥ ६७ ॥

མི་མེད་ནགས་སུ་སྡུག་གིས་ནི། སྨད་ཀྱི་ཡུས་ཕྱེད་ཟོས་གྱུར་ཅིང་།
བྱ་བཞི་ཡིས་ནི་ངུ་བཞིན་དུ། བཟང་བར་གྱུར་པ་བྱམ་ཟེའི་གཟུགས། 68

ཁྲག་ནི་མང་པོ་རབ་ཟག་ཅིང་། ཚྭ་མའི་དཀྱིལ་འཁོར་འཕྱང་བར་ལྷུན།
སྐྱེགས་བས་བཏེགས་པར་བྱས་པ་བཞིན། སྡུག་ཀྱང་སྲོག་དང་མ་བྲལ་ཏེ། 69

རབ་དུ་གསར་པ་ཤ་ཡི་དྲེས། ཤ་ཟིའི་ཚོགས་ནོམས་རྟེས་འབྲང་བ།
བཀོམ་ཚགས་ཀྱིལ་དང་ཀྱིན་པོས་བསྐྱེད། ནོར་མེད་ནོམས་ཀྱིས་ནོར་ལྡན་བཞིན། 70

བྱོང་ཁྲེར་དབུས་སུ་ཞུགས་པ་ལས། དེ་ནི་བྱོང་ན་གནས་ནོམས་ཀྱིས།
སྐྱིང་རྡེ་ཞུམ་དང་སྡུག་བསྔལ་གཟེར། འཇིགས་དང་ཡ་མཚན་ཀྱི་རྣ་གྱུར། 71

དེ་ཡི་བཟོད་དཀའ་སྐྱ་ངན་དང་། སྐྲག་པ་ནོམ་པ་དང་བཅས་བཞིན།
འཕྲལ་དུ་བྱོང་གི་བྱད་མེད་ནོམས། འཇིགས་པས་སྐྱིད་ནི་ཡུག་པར་བྱེས། 72

དེ་ནས་ས་བདག་སྲིང་བ་ནོམས། བལ་ཕྱིར་འདུན་སར་འཁོད་པ་དེའི།
མདུན་དུ་བྱ་གཟུགས་བཞི་པོ་དེས། དེ་ནི་ཁྱི་ལ་བཞག་སྟེ་བཀོད། 73

མི་བཟང་ཉོན་མོངས་ནོམ་འཁྲུགས་ཤིང་། མི་སྡུག་ཆ་ལུགས་དེ་མཐོང་ནས།
སྐྱེ་བོ་བཞིན་གྱི་ཚོགས་ནོམས་ནི། སྐྱ་མེད་མིག་ནི་ཟུམ་པར་གྱུར། 74

འདར་བས་འཁྲུགས་ཤིང་བཀྲོང་པ་ཡིས། དཔྱང་པ་གཡས་པ་བསྐྱངས་བྱས་ནས།
གཏུང་བས་ཡི་གེ་བྲལ་བའི་ཚོག། དེ་ཡིས་ས་སྐྱོང་དག་ལ་སྨྲས། 75

भक्षिताधःशरीरार्द्धो व्याघ्रेण विजने वने ।
पुच्छैश्चतुर्भिराक्रन्दैर्गृहीतो ब्राह्मणाकृतिः ॥ ६८ ॥

प्रस्रवद्भूरिरुधिरो लम्बमानान्त्रमण्डलः ।
कृच्छ्रेषपणितप्राणः पापैरिव दृढ़ीकृतः ॥ ६९ ॥

प्रत्यग्रामिषगन्धेन क्रव्यादैर्भृशमन्वितः ।
लुब्धपार्थिवचौरोत्थैरनर्थैरर्थवानिव ॥ ७० ॥

नगरान्तरमासाद्य स ययौ पुरवासिनाम् ।
कारुण्यदैन्यदुःखार्त्तो भ्रमविस्मयहेतुताम् ॥ ७१ ॥

स शोक इव साकारः स त्रास इव दुःसहः ।
विदधे साध्वसायासं सहसा पौरयोषिताम् ॥ ७२ ॥

सोऽर्थिसन्दर्शनस्थानस्थितस्याथ महीपतेः ।
पुच्छरूपैश्चतुर्भिस्तैर्व्यस्तोऽग्रे मञ्चिकार्पितः ॥ ७३ ॥

तं दृष्ट्वा वैश्रसावैशविषमक्लेशविह्वलम् ।
निष्कुणिताननवनो जनोऽभून्मीलितेक्षणः ॥ ७४ ॥

स कम्पविह्वलं वक्षमुक्तमुद्दम्य दक्षिणम् ।
भुजं जगाद भूपालं व्यथाशिथिलितेक्षरः ॥ ७५ ॥

ས་བདག་ཁྱོད་ནི་དགེ་བར་གྱུར། བྱམ་ཟེ་བདག་གི་གཤས་སྐབས་འདི།
བཟོད་དཀའི་སྨིག་པ་བཞིན་དུ་ཐོབ། བདག་ལ་གཟིགས་ཤིག་སྙིང་རྗེའི་གཏེར། 76

འཁོར་བ་ལྟ་བུར་འཇིགས་པའི་ནགས། ཟབ་མོ་དག་ཏུ་སྣག་གིས་ཟིས།
སྡུག་བསྔལ་རབ་ཏུ་སྣ་ཚོགས་འདི། ཁོང་སྦྱོང་ཕྱིར་ན་བདག་འཚོའོ། 77

ཐོང་པའི་གདུང་བ་འདི་ལ་ཡང་། དྲག་པོའི་ཉོན་མོངས་བཟོད་ཤས་པའི།
སྤྱག་འདིས་བདག་ནི་མི་གཏོང་སྟེ། མཛའ་བ་ཤེས་དམ་པའི་སྐུ་བོས་བཞིན། 78

སྡུ་ཞིག་བདག་ཉིད་ལུས་ཕྱེད་བཙད། གལ་ཏེ་ཁྱོད་ལ་སྡེར་པ་ན།
དེས་ཁྱོད་འཚོ་བར་འགྱུར་རོ་ཞེས། ནམ་མཁའི་ལྷ་ཡིས་བདག་ལ་སྨྲས། 79

འགྲོ་བ་འདི་ན་སྐྱེ་བོ་རྣམས། གཞན་གྱི་དོན་ལས་ཕྱིར་ཕྱོགས་ཏེ།
ཕལ་ཆེར་རང་གི་བདེ་བ་འཚོལ། སྡུ་ཞིག་སྤོག་སྡེར་སྙིང་རྗེའི་གཏེར། 80

ཐམས་ཅད་ཆོ་ན་ཐམས་ཅད་གཏོང་། དམན་ཞིང་ཐོང་པ་རྣམས་ཀྱི་གཉེན།
ལུས་སྦྱིན་ལས་ཀྱང་ཕྱིར་མ་ཕྱོགས། ཁྱོད་ལ་སྐྱབས་སུ་བདག་སོང་ངོ་། 81

རྩལ་མེད་གྱས་ཤིང་ཙྪི་ཆེ་བའི། སྦྱིན་པར་གང་གི་འབྲས་བུ་འབྱུངས།
ཁྱོད་ཉིད་གཅིག་པུ་འཇིག་རྟེན་འདིར། ལེགས་བས་ཀོང་འཕྱང་དག་ཏུ་སྐྱེས། 82

གཏོང་ཐོད་ལྷན་པ་གང་ཁྱོད་ཀྱིས། ལེགས་བྱས་ཌི་ནི་འཇིག་རྟེན་ན།
སྦྱིན་པ་ཉིད་ཀྱི་དྲུང་བར་བགྱིད། ཡོན་ཏན་བསྒྲགས་པ་གཞན་གྱིས་ཅི། 83

स्वस्ति तुभ्यं महीपते ब्राह्मणोऽहमिमां दशाम्।
तीव्रपाप इव प्राप्तः पश्य मां करुणानिधे ॥ ७६॥

संसारघोरगहने वने व्याघ्रेण भक्षितः।
जीवाम्यवश्यभोग्यत्वात् दुःखस्यास्य गरीयसः ॥ ७७ ॥

अस्मिन्नपि विपत्तापे तीव्रक्लेशसहिष्णवः।
विमुञ्चन्ति न मां प्राणाः सुहृदः सज्जना इव ॥ ७८ ॥

ददाति यदि ते कश्चित् छित्वा देहार्द्धमात्मनः।
तत्ते जीवितमस्तीति मामूचे व्योमदेवता ॥ ७९ ॥

को ददाति जगत्यस्मिन् जीवितं करुणानिधे।
प्रायेण स्वसुखान्वेषी परार्थविमुखो जनः ॥ ८० ॥

सर्व्वदा सर्व्वदातारं दीनव्यसनबान्धवम्।
देहदानेऽप्यविमुखं त्वामस्मि शरणं गतः ॥ ८१ ॥

एकस्त्वमेव लोकेऽस्मिन् जातः सुकृतपादपः।
निर्व्याजमादरोदारं दानं यस्य फलोन्नतिः ॥ ८२ ॥

किमन्यैर्वा वदान्यस्य कीर्त्तितैर्भवतो गुणैः[१]।
दानमेवाहतो यस्य लोके सुकृतडिण्डिमः ॥ ८३ ॥

१ Orig. किममै र्वदानस्य कीर्त्तिस्ते भवतो गुणैः।

ལྷུང་ཞིང་ཉེན་རིམས་ཡོངས་སུ་སྐྱོབ། གཅང་མར་སྦྱོང་བའི་བདུལ་ཞུགས་ལྡན།
ཐོང་བའི་དུས་སུ་ཁྲོད་ལྟ་བུ། བསོད་ནམས་ཚོང་ཟོང་དག་གིས་འཕྲོག 84

མི་དམན་ཀུན་དུ་དགའ་བའི་གཉེན། ཏ་རི་ཙན་དན་བཞིན་དུ་བསིལ།
ཆྭོ་ཡི་ཕྱོགས་ཀྱི་རླུང་གིས་བཞིན། དམ་པ་རིམས་ཀྱི་གདུང་བ་འཕྲོག 85

རྣོགས་པའི་ཟླ་བ་ཁྱོད་ཀྱི་ཞལ། མཐོས་པ་འདི་ལས་འབྱུངས་པ་ཡི།
ཚོག་གི་བདུད་རྩིའི་ཆར་གྱུན་ཞི། ཟླ་བོད་ལྟ་བུས་འཚོ་བ་ཉིད། 86

དེ་ཡིས་དེ་སྐད་བརྗོད་པའི་འཕྲལ། དེ་ཡི་སྡུག་བསྔལ་སྐྱིང་ལ་འཕོས།
སྐུང་ཞིང་དོན་མས་བར་གྱུལ་པོ་ཡིས། སྙོངས་ཤིང་བགྱིལ་བ་དེ་ལ་སྨྲས། 87

སྤོག་འབྲལ་ལས་སྐྱེས་འཇིགས་པ་དག། ཁྱོད་ཀྱིས་ཐོང་ལ་དབུགས་དབྱུང་མཛོད།
ལུས་ཕྱེད་རྐོག་དབྱེད་མེད་ཉིད་དུ། གཉིས་སྐྱེས་ཁྱོད་ལ་བདག་གིས་སྨྲེག 88

གང་འདི་སྐད་ཅིག་འཇད་པའི་ལུས། འདི་ནི་བསྲུངས་ཀྱང་མི་འཛད་མིན།
དམ་པ་རིམས་ཀྱི་ལུས་འདི་ཞི། གཞན་ལ་ཕན་ཕྱིར་འཇད་པར་འགྱུར། 89

ས་སྐྱོང་དེ་སྐད་བཙོད་ཟིན་ལ། སྐྱིང་ནི་ཡང་དག་འདར་གྱུར་པ།
རྟ་རྩེས་བཅོམ་བཞིན་ཁྲོས་པོ་ཞི། ཆེན་པོ་ཁྲོ་གྲོས་ཆེན་པོས་སྐྱེས། 90

ཀྱེ་མ་བབ་ཅོལ་གོམས་པ་ལས། ཇོ་བོ་གདུང་བས་གཟིར་མིན་ནམ།
སྐྱེ་བུ་བསོད་ནམས་ཡོངས་ཟད་ལས། ཕན་པ་ཉིད་ལ་མི་རྩི་བོ། 91

आपन्नार्त्तिपरित्राणपवित्रचरितव्रताः।
प्राप्यन्ते पुण्यपण्येन विपत्काले भवद्विधाः॥ ८४॥

अमन्दानन्दसुहृदो हरिचन्दनशीतलाः।
हरन्ति सन्तः सन्तापं दक्षिणाः पवना इव॥ ८५॥

पूर्णेन्दुसुन्दरादस्मादुदिता वदनात्तव।
ज्योत्स्नेव जीवयत्येव वाणी पीयूषवर्षिणी॥ ८६॥

इत्युक्तस्तेन सहसा हृदि संक्रान्ततद्व्यथः।
सम्मोहमूर्च्छितं राजा तमूचे वाचमाकुलम्[1]॥ ८७॥

समाश्वसिहि मुञ्च त्वं भयं प्राणवियोगजम्।
प्रयच्छामि शरीरार्द्धमविचार्य्यैव ते द्विज॥ ८८॥

धन्यस्य यात्ययं कायः परोपकृतये क्षतिम्।
क्षणक्षयी हि देहोऽयं रक्षमाणोऽपि नाक्षयः॥ ८९॥

इत्युक्तवति भूपाले समुत्कम्पितमानसः।
वज्राहत इवोवाच महामात्यो महामतिः॥ ९०॥

अहो नु साहसाभ्यासादायासव्यसनी प्रभुः।
हितं न गणयत्येव प्रजापुण्यपरिक्षयात्॥ ९१॥

---

१ Orig. तमूर्खवाचराकुलम्।

སྐྱེ་བོ་འབྱོར་པར་བྱེད་པའི་མགུ། ཁྱོད་མཚུངས་ཡོན་དུན་ལྡན་པ་སྟེ།
གང་ཞིག་གཡོག་འཁོར་གྱས་པས་བརྟེན། ཉན་དང་བྱེད་པོ་ས་ཡི་བདག། 92

རྩོ་བོ་གླང་ཆེན་རོལ་པ་ལྟར། མིག་རྒྱས་པན་པ་མི་མཛད་ན།
འཁོར་བཟང་ནོམས་ཀྱི་དབང་ཐང་དང་། ཕུན་ཚོགས་འདི་སྟེད་ཁོར་རྟེ། 93

འདུལ་བ་སྟེ་བ་ནོམས་ཀྱི་ཚོག། དགེ་བའི་མེ་དོག་གིས་བསྲུམས་པ།
སྟོང་རྟེའི་དོགས་པ་གང་དག་གིས། ནོ་བར་བགྱིས་ཏེ་ཡུན་རིང་མཛེས། 94

འགྲོ་ནོམས་བསྲུང་བའི་རིན་ཆེན་བྱིས*། སྐུ་ལུས་སུ་ཞིག་སྟོང་གུང་པ།
འདི་ཀི་སྲིན་པོའཁམ་ཀ་ཟ་སྟེ། †སུ་བྱེད་བྱམ་ཟེའི་ནོམ་པར་བྱས། 95

གཡ་ཏེ་འདི་ཀི་ཆེ་བའི་སྐྱུ། འདི་ཀི་ངེས་པར་མ་བགྱིས་ན།
ལུས་འདི་ཆུས་པ་སྐད་ཅིག་ཀྱང་། འཆོ་བ་དེ་ལྟ་གལ་མཆིས། 96

གདོན་ངན་དག་གི་ལེགས་བྱས་ཀི། རྟོག་དཔྱོད་མེད་པ་གང་བྱེད་པ།
དེ་དག་བདག་ཉིད་གདུང་ཞིང་རྩུབ། འཇིག་རྟེན་གཞན་དུའང་བདེ་བ་མེད། 97

དཀའ་དུ་ནས་པ་ཁོ་ན་སྟེག། མི་ནུས་པ་ཅི་ཐེ་ལྟར་སྟེག།
བདོག་ཀུན་དང་ཤི་ལུས་སྟེགས་སོགས། རབ་དུ་སྐྱ་བ་ཁོ་ནས་མཛེས། 98

གང་འདི་ཀྱི་མཚོར་ཆོར་བྱ་སྟེར། རིང་ནས་ནོ་བའི་བདུད་རྩི་སྟེ།
སྐྱོང་བ་ཡང་དག་འོངས་ནོམས་ཀྱིས། དེར་ཤི་བདུང་བའང་གཞན་ལས་སོ། 99

---

* ཐྱི། † ཐུས་ཐེད་ ?

प्रजानां भूतये शक्तः कोऽन्यस्त्वत्सदृशो गुणी।
यद्भक्तिमुखरो भृत्यः श्रोता कर्त्ता च भूपतिः॥ ९२॥

न करोति हितं स्वामी गजलीलानिमीलितः।
गणनीयाः सुभृत्यानामियत्यो[1] भोगसम्पदः॥ ९३॥

भान्ति ते सुचिरं कर्णे यैः कृता मधुमञ्जरी।
कल्याणकर्णिकाकीर्णा वाणी विनयवादिनाम्॥ ९४॥

राक्षसोऽयं पिशाचो वा छद्मना ब्राह्मणाकृतिः।
रक्षारत्नस्य जगतां शरीरैरर्थितां गतः॥ ९५॥

यदि नाम न मायेयं कृता तेन महीयसी।
तत्कथं कृत्तदेहस्य क्षणमप्यस्ति जीवितम्॥ ९६॥

अविचार्य्यैव सुकृतं क्रियते दुर्ग्रहेण यत्।
तदात्मपीडापरुषं परलोकेऽपि निःसुखम्॥ ९७॥

शक्यमेव सदा दद्यादशक्यं दीयते कथम्।
सर्व्वस्वदेहदानादि प्रवाद एव शोभनः॥ ९८॥

कर्णामृतमिदं दूराद् यन्महार्थिमणिप्रदः।
सम्प्राप्तानां पुनस्तच्च पानमस्यान्यतोऽर्थिनाम्[2]॥ ९९॥

---

१ Orig. सुभृत्यानामियभ्यो। २ Orig. मानतेमस्य०।

བྱུལ་པོ་སྐྱེ་བོ་རྣམས་ཀྱི་སྡོག། སྟོང་བ་རྣམས་ཀྱི་ཡིད་བཞིན་ནོར།
ཆྱོད་ཤེ་འབད་པ་ཐམས་ཅད་ཀྱིས། གཞན་སྡོག་གིས་ཀྱང་བསྲུང་བར་འོས། 100

ལྷ་གཅིག་བབ་ཅོལ་མ་མཛད་པས། བདག་ལ་དང་ཞིང་བཅུ་བར་མཛོད།
མཆིང་བུ་དུམ་བུའི་སྐད་དུ་ནི། རིན་ཅེན་བཅོང་བར་མ་མཛད་ཅིག། 101

འདི་སྐྱས་རྣེ་ཡི་ཞབས་དག་ལ། བློན་པོའི་གང་ཟག་འགྲེལ་གྱུར་ཀྱང་།
ས་བདག་ལྷས་ནི་སྨིན་པ་ཡི། ནོམ་པར་བཏུག་ལས་གཡོས་མ་གྱུར། 102

དགའ་བའི་འཇུམ་གྱིས་ཕྱེ་བ་ཡི། སོ་ཡི་འོད་ཀྱིས་སྤྲོག་ལ་ནི།
ཚགས་པ་མྱོངས་པའི་སྐུན་པ་དག། ཡོངས་སུ་ཟུག*་ས་ཞིག་དེ་ཡིས་སྐྱས། 103

བློན་པོ་ཆེན་པོ་ཆྱོད་ཀྱིས་ནི། གུས་དང་བཅས་པ་འབའ་ཞིག་ཏུ།
གསལ་བར་བརྗོད་དེ་བྱམ་རྩེའི་སྤྲོག། གེ་ཚོམ་ཡིས་མི་བཟོད་དོ། 104

དོ་ཤལ་གྲང་རེག་པའྱོ་དང་། པད་ཙོ་རྒྱ་བ་ཙན་དན་གྱིས།
ནང་གི་གདུང་བཟློག་སྟོང་བ་ནི། ཕྱིར་ཕྱོགས་སྐྱག་བསྲལ་ལས་སྐྱེས་མིན། 105

སྐྱག་བསྲལ་དག་གིས་གཟིར་བ་ཀུན། ཀུན་ནས་འཕྲོག་སེམས་སྟོ་ལྡན་པ།
བདག་གི་བྱང་ཆུབ་བར་ཆད་ནི། བློ་བཟང་བགྱི་བར་མི་འོས་སོ། 106

ཡང་དག་རྟོགས་པའི་བྱང་ཆུབ་ཀྱིས། སེམས་ཀྱིས་འདས་པ་བདག་གིས་དྲན།
སྐྱེ་བ་གཞན་དུའང་ལུས་པོ་དག། བྱིན་པས་བདག་ནི་ནད་མེད་གྱུར། 107.

* ཟུགས།

रक्ष्यः सर्व्वप्रयत्नेन परेषामपि जीवितैः।
प्रजानां जीवितं राजन्नर्थिचिन्तामणिर्भवान्॥ १००॥

प्रसीद दयया स्मासु देव मा साहसं कृथाः।
न काचशकलस्यार्थे क्रियते चात्मविक्रयः॥ १०१॥

इत्युक्ता पादयोः पत्युः पपातामात्यपुङ्गवः।
शरीरदानसङ्कल्पाद् नोच्चचाल च भूपतिः॥ १०२॥

सोऽवदत् प्रणयस्मेरविकसद्वदनद्युतिः।
जीवितस्नेहसम्मोहतमः परिहरन्निव॥ १०३॥

केवलं भक्तिसंयुक्तमुक्तं व्यक्तमिदं त्वया।
न सहेऽहं महामात्य विप्रस्य प्राणसंशयम्॥ १०४॥

हारैस्तुषारैः कमलैर्मृणालैरिन्दुचन्दनैः।
निवर्त्ततेऽन्तःसन्तापो नार्थिवैमुख्यदुःखजः॥ १०५॥

सर्व्वथा सर्व्वदुःखार्त्तिहरणोद्यतचेतसः।
न बोधेरन्तरायं मे सुमते कर्त्तुमर्हसि॥ १०६॥

जन्मान्तरेऽपि ददतो देहं मे न व्यथाभवत्।
स्मराम्यतीतवृत्तस्य सम्यक् सम्बोधिचेतसा॥ १०७॥

སྡུག་མོ་ལྟོགས་ཤིང་ཉམས་མེད་སྟོན། བྱ་ནི་བཟའ་བར་བཙོན་པ་མཁོང་།
དེ་བསྲུང་སླབ་དུ་ཕྱས་པོ་ནི། ཆོས་འགྱུར་མེད་པར་བདག་གིས་བྱིན། 108

ཤི་བིར་སྐྱེས་ཆོ་ལོང་བ་ལ། མིག་ནི་ཟུང་དག་བདག་གིས་བྱིན།
ཁྲ་ལས་སྐྱེས་བའི་འཇིགས་བ་ལས། ཕྱག་རོན་རང་གི་སྲོག་གིས་བསྲུངས། 109

ཟླ་བའི་འོད་དུ་གྱུར་ཆེ་ཡང་། དྲག་པོའི་མིག་ལ་མགོ་བོ་བདུང་།
སྐྱེ་བ་གཞན་དུ་བོདྷི་ཀྱན་དང་། བྱ་དང་ཆུང་མ་སོགས་ཀྱང་བྱིན། 110

ས་སྟོང་བྱང་ཆུབ་སེམས་དཔའ་ཡིས། དེ་སྐད་སྨྲས་པའི་ཚིག་པོ་མཆོག།
གསོན་མིན་ཤི་བ་མ་ཡིན་བཞིན། དབང་པོ་གདུང་བས་ཉེན་པར་གྱུར། 111

དེ་ནས་སོག་ལེ་རྟོན་པོ་ཡིས། སྐུ་ལུས་བཙད་པའི་བྱ་བ་དག།
བགོམ་པར་མི་རྣམ་གྱོལ་པོ་དེ་བཀས། *བཟོ་བོ་དག་ལ་བསྐོས་པར་གྱུར། 112

མྱ་ངན་བྲག་པོས་འབངས་དེ་དག། བཙུ་བྱིན་སྐུ་ཡིས་ནོམ་རྩོངས་ཏེ།
ཇི་ཞིག་ལྟར་སྡེས་ས་བདག་གིས། ལུས་ནི་གཅོད་ལ་ཡང་དག་ཞུགས། 113

སོག་ལེ་རྣོ་ཞིང་རྩུབ་པ་ཡིས། མི་བདག་ནོམ་འགྱུར་མི་མངའ་བའི།
ལུས་ཕྱེད་ནོམ་པར་བཙད་པའི་ཚེ། ས་ནི་ཡང་དག་གཡོས་པར་གྱུར། 114

སྐར་མདའ་ལྟུང་བའི་གོས་དམར་ཅན། བྱོ་སྐར་འཁྲུགས་ཤིང་སྐྲ་ཆེན་སྐྲོགས།
མཆེ་མའི་ཐེགས་པའི་ཆོགས་ལྟུང་ཞིང་། མཁའ་ནི་སྐྲ་བཅས་ཏུ་བ་བཞིན། 115

---

*ཡ་ལ་གཏ་ཞེས་བྱ་བ་བཟོ་བོ་།

पुरा दृष्ट्वोद्यतां व्याघ्रीं क्षुत्क्षामां पोतभक्षणे।
तद्रक्षायै मया दत्तं शरीरमविक्षरिणा॥ १०८॥

शिविजन्मनि चान्धाय दत्तं नेत्रयुगं मया।
रक्षितश्च स्वदेहेन कपोतः श्येनकाद् भयात्॥ १०९॥

चन्द्रप्रभावतारे च रौद्राक्षायार्पितं शिरः।
सर्व्वस्वपुत्रदारादि दत्तं चान्येषु जन्मसु॥ ११०॥

इत्युक्ते बोधिसत्त्वेन भूभुजाममात्यवरः।
न सजीवो न निर्जीव इवाभूत् व्यथितेन्द्रियः॥ १११॥

अलङ्घ्यशासनेनाथ राज्ञा क्रकचधारया।
नियुक्तौ पलगण्डाख्यौ शरीरच्छेदकर्म्मणि॥ ११२॥

तौ तीव्रशोकविवशौ शक्रमायाविमोहितौ।
कदाचिदिव भूभर्त्तुर्देहच्छेदे समुद्यतौ॥ ११३॥

नृपतेर्निर्व्विकारस्य क्रूरक्रकचधारया।
विदार्य्यमाणे देहार्धे पृथिवी समकम्पत॥ ११४॥

भ्रष्टोल्का रक्तवसना निर्घातच्युततारका।
द्यौः सशब्दं रुरोदेव कीर्णाश्रुकणसन्ततिः॥ ११५॥

མི་རྟང་གཟིགས་པས་དབུགས་ཇོ་ཡི། སྡུག་བསྔལ་ཤིན་དུ་བཟོད་དཀའ་བྱུར།
ཉི་མ་དུལ་གྱིས་གོས་དག་གིས། ཐུབ་དུ་གདོང་ཕ་བསྒྲིགས་པ་བཞིན། 116

སྐྱེ་གཤེའི་མགོན་གྱི་ལུགས་ལ་དེར། སོག་ལེགས་ཀ་ཁ་གས་པས་སྐྱེ་གཤེ་རྣམས།
ངུས་ཤིང་ཕྱོགས་ཀྱི་བྱ་མོ་ཡི། སྐུ་སྣ་རྣམས་ཀྱིས་ཆོ་ངེས་བཀང་། 117

མི་བདག་སྙིང་སྟོབས་མ་བྱི་ན*། བཙོ་བྱིན་གཉིས་སྐྱེས་མདོག་དབྱིབས་ཅན།
ཡ་མཚན་འགྲོད་པས་རོན་བ་ཡི། ཞེམས་ཀྱིས་མཁྲོང་ནས་རིང་ཉིག་བསམས། 118

འདི་ལ་ཁྲོ་ཆེན་འདི་ཡི་ཡིད། གཞན་གྱི་དོན་དུ་གདུང་བ་ལ།
སྙིང་རྗེ་བས་ཀྱང་མཉེན་པ་དང་། རྟོ་རྗེ་བས་ཀྱང་སྤ་བ་ཐོག། 119

ཀ་མ་བདག་ཉིད་ཆེ་སྤྲོད་ཚུལ། གྲུ་མཆོ་བས་ཀྱང་ཤིན་དུ་ཟབ།
རི་རབ་པས་ཀྱང་ཡང་དག་མཐོ། མཐོ་རིས་པས་ཀྱང་ངོ་མཚར་བཅས། 120

ཀྱེ་མ་སྤྲོག་ནི་འབྱོ་ན་ཡང་། སྙིང་སྟོབས་གྲུ་མཆོ་སྙིང་སྟོབས་ལྷན།
དམ་པ་ཡ་ངར་ལྷུང་ན་ཡང་། ཆེན་པོ་ཉིད་ནི་མི་ཉམས་བཞིན། 121

མིག་སྟོང་ལྷན་པས་དེ་བས་མས་ཆོ། ས་ཡི་བདག་པོའི་ལྟེ་བོ་ན།
ལུས་ཕྱེད་ངེས་པར་བཅད་ནས་ནི། ས་ལ་སྐུད་དུ་ལྷུང་བར་གྱུར། 122

ལུས་ནི་རོ་མ་གཉིས་གྱུར་ཀྱང་དེ། དགའ་དང་སྤྲོ་བའི་ཇང་བཞིན་གྱུར།
འབྱུང་པོ་ཀུན་ཡོངས་ཀཡུབ་པ་ཡི། སྙིང་སྟོབས་ཀྱིས་ནི་སྤྲོག་ནས་བཟུང་། 123

* མ་ཐེ་བ (undiminished).

वैश्रसालोकनोद्भूततीव्रदुःखासहिष्णुना।
तूर्णं रजःपटेनेव रविणा पिहितं मुखम् ॥ ११६ ॥

तस्मिन् प्रजाः प्रजानाथे क्रकचाक्रान्तविग्रहे।
चक्रन्दुः पूरिताक्रन्दा दिग्वधूभिः प्रतिस्वनैः ॥ ११७ ॥

अनुच्छसत्त्वमालोक्य नृपं शक्रो द्विजाकृतिः।
विस्मयानुशयाक्रान्तचित्तश्चिरमचिन्तयत् ॥ ११८ ॥

अहो महामतेरस्य करुणाकोमलं मनः।
प्राप्तं परार्थपीडासु वज्रादपि कठोरताम् ॥ ११९ ॥

सागरादपि गम्भीरं मेरोरपि समुन्नतम्।
चिदिवादपि साश्चर्यमहो वृत्तं महात्मनाम् ॥ १२० ॥

अहो प्राणप्रवासेऽपि सत्त्वं सत्त्वमहोदधेः।
साधोरिव विपत्पाते महत्त्वं नावहीयते ॥ १२१ ॥

इति चिन्तयति क्षिप्रं सहस्राक्षे क्षितिप्रभोः।
नाभेरधःशरीरार्द्धं निष्कृत्तमपतत् क्षितौ ॥ १२२ ॥

स द्विधाभूतदेहोऽपि हर्षोत्साहमयोऽभवत्।
सर्व्वभूतपरित्राणसत्त्वेन धृतजीवितः ॥ १२३ ॥

*དཔལ་བཀའ་ཡིས་ལུས་ཕྱེད་ནི། སྐྱར་ནས་ཉམས་པ་ཧོལ་དུ་གནས།
ཡོངས་རྫོགས་ལུས་ནི་ཡང་དག་ལངས། བྱམ་ཟེ་ཡིས་ནི་དེ་ལ་སྐྱེས། 124

ཇེ་མ་ཀྱེལ་པོ་ཁྲིད་ཀྱི་ནི། རྩོལ་མེད་ལུས་ཀྱི་སྒྲིབ་པ་ཡིས།
དཀྱེལ་བྱལ་མཆོད་འོས་ཁྱད་པར་དུ། དྲི་མེད་བཀས་པས་ཧོམ་པར་མཛེས། 125

ཁྲིད་ཡིད་ཧོར་བྱ་དྲི་མེད་དང་། མཆོངས་པ་ཅི་ཡང་མ་བྱས་པ།
ཀེ་མ་བྱེད་†པོ་རྣོངས་པ་དག། དཔེ་ཡིས་ཀྱང་ནི་ཤིན་དུ་དབྱལ། 126

དྲང་ཞིང་རབ་རྒྱམ་མངར་བས་ཁེངས། མཐོ་ཞིང་བཅད་པར་བྱུང་པ་ཡིས།
བྱར་ཤིང་སྡོང་པོ་ལྟ་བུ་ཡི། གཞན་དོན་བཟོད་དཀའི་གདུང་བ་བཟོད། 127

འདི་སྐྱས་བྱམ་ཟེའི་དབྱིབས་ཅན་གྱི། བཙུ་བྱིན་དྲན་པ་ལས་སྐྱེས་པ།
ཡང་དག་གསོ་བྱེད་སྐྱབ་གྱི་ཚོགས། བདུད་རྩིའི་ཁུ་བས་དེ་རྫོགས་བྱས། 128

དེ་ནས་‡བྱད་གཟུགས་གསལ་བར་བྱས། ཡོངས་སུ་ཚོམ་ནས་བཙུ་བྱིན་གྱིས།
རང་གི་ལུས་ཕྱེད་ལེགས་སྐྱར་བའི། ས་ཡི་བདག་པོ་རབ་དུ་བསྐྱགས། 129

དེ་ནས་མེ་ཏོག་དཀར་པོའི་ཚོགས། མཁའ་ལས་རབ་དུ་ཕྱུང་བྱུང་པས།
དེ་ཚེ་ས་གཞི་དག་ཞིང་དུགོད། བྱེ་དུ་བསྐྱེད་པ་ལྟ་བུས་མཛེས། 130

དེ་ལྟར་བྱུང་པས་མཚོར་སྐྱེས་པ། ཐུབ་པས་སྐབས་དེར་དེ་ལ་ནི།
བཙུན་མོ་དཔག་མ་བྱིན་བའི་འོད། ཁྱེར་ཏེ་མངོན་དུ་ཐོགས་ནས་ཕུལ། 131

---

* དེ་ † ཇེ་པོ་ (ཛེཔཐཿ). ‡ ཇེ་ ཁཏྲཔཱ་ (আকার).

तदाश्रया शरीरार्द्धे श्लिष्टे सम्पूर्णविग्रहः।
स्वस्थक्षितिः समुत्थाय ब्राह्मणस्तमभाषत ॥ १२४ ॥

अहो विराजसे राजन् पूज्यं विरजसस्तव।
निर्व्याजदेहदानेन विशेषन्तु भवद्यशः[1] ॥ १२५ ॥

त्वन्मनोमणिविमल्यतुल्यं किञ्चिदकुर्व्वतः।
उपमानेन दारिद्र्यमहो मुग्धस्य वेधसः ॥ १२६ ॥

क्षत्तः सुवृत्तः सरलः परार्थे मधुराशयः।
सहसे दुःसहां पीड़ामिक्षुकाण्डमिवोन्नतः ॥ १२७ ॥

इत्युक्त्वा ब्राह्मणाकारः शक्रस्तं स्मृतिजन्मभिः।
सञ्जीवन्नौषधिजातैः सुधास्यन्दैरपूरयत् ॥ १२८ ॥

ततः प्रकटिताकारः परितोषात् पुरन्दरः।
सुश्लिष्टनिजदेहार्द्धं प्रशशंस महीपतिम् ॥ १२९ ॥

अथाम्बरान्निपतितः सितकुसुमसञ्चयः।
तत्कालोल्लासितक्षोणीहर्षहास इवाबभौ ॥ १३० ॥

अथान्तरे मुनिस्तस्मै प्रियां जायां जयप्रभाम्।
आदायाभ्येत्य तद्वृत्तं जाताश्चर्य्यो न्यवेदयत् ॥ १३१ ॥

---

१ Orig. विशेषद्यशः।

ནོན་དག་རང་གི་གྲགས་པ་བཞིན། བཙུན་མོ་དེ་དང་ཡང་དག་འགྲོགས།
གཅིག་ལ་ནོན་འགྱུར་མི་མངའ་བ། བསྟོད་བྱེད་བྱིས་དེས་ཡིས་སྨྲ། 132

དེ་ནས་རབ་མཆོག་སེང་གེའི་ཕྱི། བི་ཤྭ་ཀཱརས་སྐྱེལ་པ་དང་།
རིན་ཆེན་ཆར་གྱིས་རབ་གང་བའི། འཛམ་བུའི་གླིང་དུ་སང་ཐང་ན། 133

ཟླ་ཡི་དབང་པོས་བསྟན་པ་བྱས་ནས། བཙུན་མོར་བཅས་པ་མངོན་དབང་བསྐྱེད།
སྨིན་པའི་བསོད་ནམས་མཐུས་བསྐྱེན་པའི། དག་བས་སྐྱེ་གྱི་ཚོར་པར་བྱས། 134

འཁོར་བའི་སེམས་ཅན་མཐའ་དག་ནི། ཡང་དག་སྒྲོལ་བའི་ཕྱིར་ཞུགས་བྱས།
ཡང་དག་རྫོགས་པའི་བྱང་ཆུབ་དུ། མངོན་འཚང་གྱི་ཡིད་རབ་དག་རྒྱུར། 135

གྱུལ་པོའི་ཐུགས་ནི་བྱམས་པ་དང་ལྡན་སྙིང་རྗེ་དར་བས་སྙིང་སྟོབས་གྲུབ།
ནོམ་པར་དག་ཅིང་ཐོང་བའི་གདུང་བ་རབ་ཞིའི་འབྲས་གྱིས་དག།

རབ་སྟེར་རབ་དགའི་ཚུ་ཡིས་བགྱིས་པའི་མིག་གིས་བལྟས་ནས་སྐྱབས་བྱེར་པའི། 136
བསྟོ་བྱེད་འཆི་མེད་གྲོང་ཁྱེར་དེ་ཡི་གྲགས་བས་ཀྱེབས་པ་དག་དུ་སོང་།

དེ་སྟར་དེ་ནི་ལྷ་ཡི་ཚོགས་དང་བྲག་པ་གཅིག་སྨིན་དང་།
ལྷོ་འཕྲེའི་དཔང་གི་སྤྱི་ཐང་མཛེས་པའི་བྱག་པས་མཆོད་སྐོན་མཐུ།

ས་ནོམས་དག་ནི་མཐོ་རིས་བརྐོག་བྱས་བྱས་ཤིང་བསྲུང་ཆུས་ལ།
སྨིན་བྱལ་འབྱོར་པ་དག་གིས་མཛེས་པ་ཐོབ་སྐོན་བྱང་ཆུབ་སེམས། 137

---

* (ཀུ་ལཀ)

पूतया[1] सङ्गतः पत्न्या स्वकीर्त्त्येव विशुद्धया।
उवाच पृष्टः शक्रेण निकारे निर्विकारितः ॥ १३२ ॥

ततः सिंहासने दिव्ये वि॰ कर्म्मविनिर्म्मिते।
रत्नवर्षसमाकीर्णे जम्बुद्वीपे स भूपतिः ॥ १३३ ॥

अभिषिक्तः सुरेन्द्रेण प्रसाद्य दयितासखः।
दानपुण्यप्रभावोत्थकुशलव्यापितप्रजः ॥ १३४ ॥

समाप्तसत्त्वसंसारसन्तारणकृतव्रतः।
सम्यक्सम्बोधिसम्बुद्धमनाः प्रमुदितोऽभवत् ॥ १३५ ॥

मैवं चेतस्तरुणकरुणं सत्त्वसिद्धं विशुद्धम्
आपन्नार्त्तिप्रशमनफलस्फीतमात्मप्रदानम्।

दृष्ट्वा राज्ञः प्रमोदसलिलक्षालिताक्षो[2] विलक्षः
शक्रः प्रायादमरनगरीं पूरितां तद्यशोभिः ॥ १३६ ॥

इति स विबुधवृन्दैः सिद्धयक्षोरगेन्द्रैः
पुलकरुचिरवक्त्रैरर्च्यमानप्रभावः।

अवनिमवनशक्तः कल्पयन्नाककल्पाम्
अभवविभवशोभामाप्तवान् बोधिसत्त्वः ॥ १३७ ॥

---

१ Orig. पतया। २ Orig. प्रमोदसलिलक्षालितां भो।

སྟོན་བྱང་ཡང་དག་བརྗོད་པ་ཡིས། སྤྱིན་པ་ཁྱད་འཕགས་གསལ་བྱེད་ཅིང་།
དགེ་སློང་ནོམས་ལ་གདོམས་པའི་སྒྲ། བཅོམ་ལྡན་ཀྱིལ་བ་དེ་སྐད་གསུང་། 138

ཞེས་པ་དགེ་བའི་དཔང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་
རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དཔལ་གྱི་
སྟེའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་གཉིས་པོའོ།།། ॥

पूर्व्वावतारसंवादे दानोत्कर्षमुदाहरन्।
उपदेशाय भिक्षूणामित्याह भगवान् जिनः॥ १३८॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
श्रीसेनावदानं नाम द्वितीयः पल्लवः॥

A list of those cases, in which apart from evident clerical errors and slips, some changes might have been made either in spelling or in grammar to conform to the rules of ordinary Sanskrit, is subjoined.

		WORDS AS THEY OCCUR IN THE XYLOGRAPH.	SUGGESTED ALTERATIONS.
3rd Pallava.			
Sloka	16	गोविन्दो नाभिगर्भेण	गोविन्दनाभिर्गर्भेण
,,	21	पाथेयमन्ये	पाथेयमन्त्ये
,,	22	ह्रपो वधूवचः	ह्रपवधूवचः
,,	,,	जने	जनः
,,	26	तुरितं	दुरितं
,,	28	पुष्परत्नध्वजं ह्रचं पताका॰	पुष्परत्नध्वजच्छ्रचपताका॰
,,	41	सोच्छासेनेव	सोच्छ्वासेनेव
,,	55	सर्व्वार्थसार्थ॰	सर्व्वार्थिसार्थ॰
,,	66	वेगमं	वेश्मसं
,,	77	यात्यनुकम्पताम्	यात्यनुकम्प्यताम्
,,	81	तूर्णं	तूर्णं
,,	99	श्रक्षानां	रुक्षानां
,,	107	वनमवविगाह्यताम्	वनमेव विगाह्यताम्
;,	118	बभूव दृष्टि॰	बभूवादृष्टि॰
,,	122	संसारवैमुख्यः विवेक॰	संसारवैमुख्यविवेक॰
,,	123	न देयं	नादेयं
,,	124	तथेत्यवधार्य्य	तथेत्याधार्य्य
,,	138	मनोदृत्तिरिव न सुखतां	मनोदृत्तिरिव निःसुखतां
,,	146	भोगत्रणो नैव	भोगत्रणेनैव
,,	148	निलयं	निलये
,,	149	विस्रष्टाः	विस्रष्टाः
,,	150	विश्वस्त॰	विश्रस्त॰
,,	155	न	नु

WORDS AS THEY OCCUR IN THE XYLOGRAPH.		SUGGESTED ALTERATIONS.
3rd Pallava.		
Śloka 156	ऋण०	ऋणं
„ 158	कृपाकोमलचित्तदृत्तैः	कृपाकोमलचित्तवृत्तैः
„ 161	कृशंसदृत्तैः	कृशंसवृत्तैः
„ 164	सहर्षः	स हर्षं
„ „	°मनोरूथेन	°मनोरथस्य

CORRIGENDA.

Page 59	मान्धातावदानम् ॥ ४ ॥	मान्धात्रवदानम् ॥ ४ ॥

PALLAVA III.

S'loka	5	अतः	श्रुतः
,,	6	འདྲིན་	འཇོག་
,,	21	བྱོས	བྱོལ
,,	,,	སྟུག་བསྔལ་	སྟུག་བསྔལ་
,,	56	མི་འཆོ	མི་འཆོ
,,	59	पानभोजनम	पानभोजनम्
,,	64	འཆོ་བ་མེད	འཆོ་བ་མེད་
,,	82	गजम	गजम्
,,	102	भृङ्गते	भुङ्गते
,,	106	བཅོ་བ་	བཟློ་བ་
,,	116	བྱང	བྱོང་
,,	117	བྱུང་	བྱུང་
,,	133	एकाकौनं	एकाकिनं
,,	154	दृत्यर्थिताः	दृत्यर्थितः
,,	160	सरक्त०	स रक्त०
,,	168	०र्भागव०	र्भार्गव०
,,	176	རང	རབ་

PALLAVA IV.

S'loka	1	अति	श्रुति
,,	35	སྟུག་བསྔལ་	སྟུག་བསྔལ་

मणिचूडावदानम् ॥ ३ ॥

मान्धातावदानम् ॥ ४ ॥

ཡིད་བཞིན་ནོར་བུ་གཙུག་ནོར་གྱིས། ३

ང་ལས་ནུ་ཡང་འཇིག་རྟེན་གྱོལ།། ৫

Chapter III.

ཡལ་འདབ་གསུམ་པ།

གཙུག་ན་ཏོར་བྱའི་རྟོགས་པ་བརྗོད་པ་ནི།

འགྲོ་འདིར་སྨོས་པ་མ་དང་བྱང་རིན་ཅེན་ཚོགས།
ཆུ་སྲིན་འབྱུང་གནས་དག་ལས་སྐྱེ་བར་ལྷག
སྐུ་ཞིག་ཀྱང་ནི་རབ་དུ་གསལ་བ་ཏེ།
བདེ་བར་འགྲོ་བ་སྐྱེས་བྱ་རིན་ཅེན་སྐྱེས། 1

*བ་གམ་འདོད་ཆོགས་ག་བྱར་བྱིས། ཡོངས་སུ་དཀར་པོའི་གྲོང་ཁྱེར་ནི།
སྤྲ་ཀེ་དེ་ཞེས་བྱ་བསྟེ། སྐལ་བཟང་ས་ཡི་ཐིག་ལེ་ཡོད། 2

འཇུག་ངོགས་བཞིན་དུ་བསྟེན་འོས་གང་། བསོད་ནམས་བྱེད་གཙང་གཟི་བྱིན་དང་།
སྐྱིང་སྟོབས་རང་བཞིན་གང་གླུ་ལྟར། ཏེ་མེད་ཡིད་སྐན་དག་དུ་གནས། 3

ནམ་ཞིག་གྲགས་པའི་མེ་དོག་ལྟེག། བསོད་ནམས་དྲི་བཟང་རབ་དུ་གྱོས།
ལེགས་བྱས་སྐྱེད་ཚལ་དགའ་སྟེར་དུ། གྲོང་ཁྱེར་པ་ནོམས་རབ་དུ་རྩེན†། 4

དེར་ནི་སངས་དག་ཆུ་གཏེར་ཆེ། རབ་མང་ཡོན་དན་རིན་ཅེན་དང་།
གྲགས་པའི་རི་བོང་མཚན་མ་བསྐྱེད། གསེར་གྱི་གཙུག་ཕུད་ཅེས་གྲགས་བྱུང་། 5

---

* ཚཽ་ཧི། † རྩེ, རབ་ཏུ།

तृतीयः पल्लवः ।

मणिचूड़ावदानम् ।

अस्मिन्नद्भुतसर्गे मकराकरजायमानमणिवर्गे ।
कोऽपि प्रकटितसुगतिः पुरुषमणिर्जायते ॥ १ ॥

अस्ति सौभिप्रभापूरकर्पूरपरिपाण्डुरम् ।
साकेतनाम नगरं सौभाग्यतिलकं भुवः ॥ २ ॥

सेव्यैः[२] प्रभासच्चमयै र्गङ्गाविमलमानसैः ।
तीर्थैरिव स्थितं यच्च प्रविचैः पुण्यकर्तृभिः ॥ ३ ॥

यशःकुसुमिते यच्च पुण्यसौरभनिर्भरे ।
रमन्ते सुकृतोद्याने नन्दने पुरवासिनः ॥ ४ ॥

तत्राभूत् भूपतिर्भूरिगुणरत्नमहोदधिः ।
भूतिर्यशःशशाङ्कस्य हेमचूड़ इति श्रुतः ॥ ५ ॥

---

१ सौभि (dome). २ Orig. सेव्यैः ।

དཀག་དྲུ་དམ་པས་བསྟེན་འོས་ཤིང་། རྩོད་དྲས་རབ་དུ་འཕྲོག་བྱེད་པ།
རྗོགས་སྡེན་ལྷ་བྱ་གང་གིས་ནི། སྐྱེ་བོ་ཆོས་ནོམས་འཇིན་པར་བྱས། 6

སངས་གཏག་བཟོད་ལ་ཀུན་ཆགས་ཤིང་། དཔལ་ཀྱིས་དཀྱིས་གྱར་སྐྱིང་རྗེ་དགའ།
རབ་གྲགས་ལ་ཡང་དབང་ཐུལ་གང་། སྐྱེ་ཀུ་ནོམས་ཀྱི་དགའ་བྱེད་གྱུར། 7

མི་གསོད་མཆོད་སྦྱིན་བསྒྲབ་ལྡན་པ། གང་གི་བསོད་ནམས་མི་འཇིགས་ཡོན།
འཆི་མེད་སྒྲ་*དབྱངས་ཡོངས་རྫོགས་པ། འབྱུང་པོ་ཀུན་ལ་བྱིན་པར་གྱུར། 8

མཐུ་དང་ལྡན་ཡང་གང་མ་རྟོག། ཧོམ་པར་འབྱོར་ཡང་སྐྱན་པར་སྨྲ།
རྗེ་ཉིད་ཡིན་ཡང་བཟོད་ལྡན་ཚུལ། ལང་ཚོ་ལྡན་ཡང་དྲང་པོ་ཐུལ། 9

མཐོན་པོར་གྱུར་པའི་ཟབ་མོ་དང་། རྒྱབའི་འོད་ཟེར་དཔའ་བོ་དང་།
སངས་ཀྱི་འཇིག་པ་དམ་པའི་ཆྱོགས། གང་གི་ཡ་མཚན་བྱས་པར་གྱུར། 10

བྱོལ་པོ་དེ་ལ་རྒྱ་མེད་པའི། བྱོན་ནི་གཉིས་ཤིག་བྱུང་གྱུར་ཏེ།
གཅིང་པ་རྗོགས་པའི་སྐྱིང་རྗེ་དང་། ལེགས་བྱས་དཔལ་ནི་དར་བབ་པའོ། 11

པདྨའི་འབྱུང་གནས་དེ་ཡིས་ནི། ལྷ་མོ་མཛེས་ལྡན་དགའ་མར་གྱུར།
སྤྲ་དྲོའི་དཔལ་བཞིན་དཀར་བྱ་ནི། སྐྱོན་མེད་དགའ་བ་མངོན་པར་འཆར། 12

ལུགས་ནི་རྗེ་ཡི་ཡོན་ཏན་དང་། དཔལ་ནི་འབར་བ་གཅིང་བ་དང་།
མཛེས་པ་ཉིད་ནི་ཁྱིམས་ཀྱིས་བཞིན། དེ་ནི་བྱོལ་པོས་རྒྱ་བས་མཛེས། 13

* Sound and voice.

सदा सदाश्रयार्हेण कलिकालापहारिणा।
कृतः कृतयुगेनेव येन धर्म्मधरो जनः॥ ६॥

महीपतिः क्षमाशक्तः श्रीहृतः करुणारतः।
वल्लभोऽभूत् प्रजानां यः प्रख्यातो विजितेन्द्रियः॥ ७॥

अमरासवसम्पूर्णामहिंसासचदीक्षितः।
ददौ यः सर्व्वभूतानां पुण्यामभयदक्षिणाम्॥ ८॥

निर्मदो यः प्रभावेऽपि विभवेऽपि प्रियंवदः।
क्षमाशीलः प्रभुत्वेऽपि यौवनेऽपि जितेन्द्रियः॥ ९॥

गम्भीरेणोन्नतिमता शूरेण शशिकान्तिना।
सत्पक्षेण क्षितिभृता येनातन्यत विस्मयः॥ १०॥

राज्ञस्तस्याद्वितीयस्य बभूवाभरणद्वयम्।
त्यागपूर्णञ्च कारुण्यं तारुण्यं सुकृतश्रियः॥ ११॥

पद्माकरस्य तस्याभूत् देवी कान्तिमती प्रिया।
प्रभातश्रीरिव सदा निर्दोषाभ्युदयोत्सवा॥ १२॥

नीतिः प्रभुगुणेनेव त्यागेन श्रीरिवोज्ज्वला।
रराज राजचन्द्रेण सा शीलेनेव चारुता॥ १३॥

དོག་ཀུ་དགའ་བྱེད་སྐྱེ་བ་དག། རབ་བཀྲམ་ཚོམ་བར་གྱུར་བ་དེས།
སལ་འཛོག་མཆོག་ཀུ་མཛེས་གྱུར་བ། མཁྲ་རིས་དཔལ་གྱི་ལྷུན་པོ་བཞིན། 14

རྡེ་ལས་དུས་སྐུ་དགེ་བའི་གནས། མངལ་ནི་དེ་ཡི་བཟང་གྱུར་ཏེ།
འཇིག་རྟེན་པད་ཀློ་འབྱོར་བའི་སྐད། ཙཱ་དི་དེ་ཡི་ཉིན་བྱེད་བཞིན། 15

བདུད་རྩིའི་ཟིར་གྱི་ཆུ་གཏེར་རྒྱས། ཚངས་པའི་པདྨ་ཁྲུག་འཁྱགས་སྟེ།
དགའ་ཐྱེད་དགའ་གིས་སྐྱབ་ཤིང་བཞིན། དེ་ནི་མངལ་གྱིས་མཛེས་པར་གྱུར། 16

དེ་ཡི་མངལ་གྱི་མཐུས་སྐྱེད་པའི། མངོན་པར་འདོད་བཞིན་མི་བདག་གིས།
མངོན་པར་འདོད་ལས་མངོན་ལྷག་ཅོར། སྐྱོང་བའི་ངོན་མཐུན་ཀུན་ལ་བྱིན། 17

སྐར་ཡང་ས་བདག་གིས་སྐྱེད་བྱེས། དགེ་བའི་མངལ་དང་ལྡན་པ་དེ།
དབྱངས་ཚ་མ་བཞིན་རང་ཉིད་ཀྱིས། དམ་ཆོས་ནོམ་པར་བཤད་པ་བྱས། 18

ཡོངས་རྫོགས་བསོད་ནམས་རིན་ཆེན་གི། ཆོས་གཏེར་བསྐྱབ་པ་རབ་འཛོད་པས།
ཐོང་ཁའི་སྐུགས་བསྟལ་ཀྱིས་པ་ལས། དོག་ཀུ་བསྲུངས་ཤིང་རབ་ཏུ་བསྲུང་། 19

འབྲོག་དགོན་བཀྲིད་དཀར་ཡོངས་སྐྱང་འཛིག་རྟེན་གི།
ཕ་རོལ་ལམ་དུ་གདུང་བས་ཉིན་ནོམས་ལ།
ཡིད་འོང་རབ་ཀྱིས་འབྲས་བུས་རྫོགས་པའི་ཕྱོགས།
ཀྱིབ་ཤིང་ཆོས་དང་མཚུངས་པ་གཉེན་ཡོད་མིན། 20

सदानन्दनविख्यातयशःप्रसरया तया।
मेरुस्त्रिदिवलक्ष्येव बभौ भूमिभृतां वरः॥ १४॥

काले कल्याणनिलयं भर्त्तुः सा गर्भमादधे।
भूत्यै भुवनपद्मस्य दिवाकरमिवादितिः॥ १५॥

अरणिः पावकेनेव वेलेवाब्धेः सुधांशुना।
ब्रह्माजेनेव गोविन्दो नाभिगर्भेण सा बभौ॥ १६॥

तस्या गर्भानुभावेन दोहदाभिमतं नृपः।
ददौ सर्व्वार्थिसार्थेभ्यो वाञ्छिताभ्यधिकं वसु॥ १७॥

पुनर्भूमिभुजा पृष्टा दोहदं शुभगर्भिणी।
सरस्वतीव सा चक्रे स्वयं सद्धर्म्मदेशनाम्॥ १८॥

पूर्णपुण्यमणिर्धर्म्मनिधिर्विधिसमुद्भृतः।
विपद्विपुलदुःखेभ्यः सदा रक्षति रक्षितः॥ १९॥

कान्तारदुर्गेषु परिच्युतानां
तापातुराणां परलोकमार्गे।
स्निग्धः प्रवृद्धः फलपूरिताशः
छायातरुर्धर्म्मसमोऽस्ति नान्यः॥ २०॥

རབ་རིབ་ཅན་ལ་སྣང་བ་ཐོང་བ་བའི་དུག་ལ་ནོར་བ་སྟུང་
ལ་ལག་པའི་མཆེལ་པ་སྟེ།
སྨྲོང་ལ་དཔག་བསམ་ལྗོན་པ་འགྲོ་ལ་ཕྱིན་བའི་ཤིང་དེ་
ལམ་གཞན་དག་ལ་ལམ་བྱེ་བཟློག་ས།
སྡུག་བསྔལ་ནད་ལ་སྨན་ཆེན་དང་ནི་སྦྱིད་པའི་འཇིག་པ་
ཀུན་འཁྲུགས་བསམ་པ་དབུགས་འབྱིན་པ།
གཏུང་བ་དག་ལ་ཟས་དན་ནགས་ཚལ་བདེན་པའི་མཛའ་
ཤེས་ཆོས་ནི་དམ་པ་ནོམས་ཀྱི་གཉེན། 21

དེ་སོགས་མི་བདག་བཙུན་མོའི་ཆོག། དཀར་བའི་ཆོས་ནི་ཐོས་བྱུང་ནས།
དཔལ་ལྡན་འགྲོ་ལ་འཇིག་རྟེན་དུ། དམ་ཆོས་གཅིག་ཡུལ་སྐྱབས་སུ་བྱུས། 22

དེ་ནས་དུས་ནི་ཡོངས་རྫོགས་ཏེ། མཁའ་ལ་བདུད་རྩིའི་འོད་ཟེར་བཞིག
འགྲོ་བའི་རབ་རིབ་འཇོམས་པའི་བྱ། ལྟ་མོ་ལ་ནི་བཅས་པར་བྱུས། 23

དེ་ཡི་གཏུག་གྱོན་ནོར་བུ་ནི། ལྟག་སྐྱེས་དག་ཏུ་སྐྱེས་བྱུར་དེ
སྐྱེ་བ་གཞན་སྤར་འགྲོགས་པ་ཡི། དབེན་པ་བཞིན་དུ་དྲི་མ་མེད། 24

དེ་ཡི་གཏུག་ན་གང་འོད་མཐུས། མཚན་མོ་ཉིན་དུ་བགྱིད་པ་ཡིས།
ནོར་བུ་བསོད་ནམས་ལ་སྐྱེས་པ། *རབ་སྡུག་དེ་ཡིས་མཛེས་པར་བྱུས། 25

* སུབྷགा ।

आलोकस्तिमिरे[1] विपद्विषमणिः पाते करालम्बनम्
यात्राकल्पतरुर्जगज्जयरथः पाथेयमन्ये पथि।
दुःखव्याधिमहौषधं भवभयोद्भ्रान्ताश्रयाश्वासनम्
तापे चन्दनकाननं स्थिरसुहृद्धर्म्मः सतां बान्धवः॥ २१॥

इत्यादिधर्म्मधवलं श्रुत्वा नृपो वधूवचः।
धर्म्मैकशरणः श्रीमान् बभूव भुवने जने॥ २२॥

ततः कालेन सम्पूर्णं द्यौरिवामृतदीधितिम्।
असूत दारकं देवी[2] जगत्तिमिरदारकम्॥ २३॥

अजायतास्य सहजश्चूड़ालङ्करणं मणिः।
प्राग्जन्मान्तरसंसक्तो विवेक इव निर्म्मलः॥ २४॥

स बभौ सुभगस्तस्य[3] मूर्द्धि पुण्यमयो मणिः।
